MUKHABHŪṢAṆAM

EDITED BY

DR. K. KUNJUNNI RAJA

THE ADYAR LIBRARY AND RESEARCH CENTRE

MUKHABHŪṢAṆAM

EDITED BY

DR. K. KUNJUNNI RAJA

THE ADYAR LIBRARY AND RESEARCH CENTRE

Adyar Library Pamphlet Series, No. 41
(*Reprint from The Adyar Library Bulletin, Vol. 37*)

© 1973 The Adyar Library and Research Centre
Adyar, Madras 600020, India

K. C. C

SBN: 0-7229-7382-9
ISBN: 0-8356-7382-0

27815
25-2-84
H
0824
MUK

Agents

AMERICAS, JAPAN

The Theosophical Publishing House,
P. O. Box 270, Wheaton, Illinois 60187, U.S.A

EUROPE AND THE UNITED KINGDOM

The Theosophical Publishing House,
68 Great Russell Street, London, WCIB 3BU, England

INDIA AND OTHER COUNTRIES

The Theosophical Publishing House,
Adyar, Madras 600020, ~~India~~

Verified

PRINTED IN INDIA

At the Vasanta Press, The Theosophical Society,
Adyar, Madras 600020

INTRODUCTION

The *Mukhabhūṣaṇa*, also called the *Rūpanirṇaya*, which is edited here for the first time is an interesting and useful anonymous work on *Kaviśikṣā* or 'instructions to the poet' dealing with grammatical points and poetic usages on the model of the last chapter of Vāmana's *Kāvyālaṃkārasūtravṛtti* and Śaraṇadeva's *Durghaṭavṛtti*. In fact most of the *sūtra-s* in the last chapter of Vāmana's text together with the discussions and illustrations have been incorporated bodily or summarized or adapted and rearranged according to the topics and included in the present work. It is divided into several sections called Vimarśa-s such as Saṃdhi Vimarśa and Kāraka Vimarśa. Apparently irregular and non-Pāṇinian usages are quoted profusely from the *Rāmāyaṇa*, the *Mahābhārata* and the *Bhāgavata*, from classical Sanskrit works like those of Kālidāsa, Bhavabhūti, Bāṇa and Harṣa, from popular Stotra works like the *Saundaryalaharī*, *Viṣṇupādādikeśastava*, *Mūkapañcaśatī* and the anonymous *Jagannāthastuti* about which nothing is known, works on poetics like the *Dhvanyāloka*, the *Vyaktiviveka* and the *Kāvyālaṃkārasūtravṛtti*, grammatical works like those of Pāṇini, Kātyāyana, Patañjali, Bhoja and Haradatta, technical works like the *Līlāvatī* and *Vṛttaratnākara*, and Kerala works like the *Yudhiṣṭhiravijaya* of Vāsudeva and the *Śukasandeśa* of Lakṣmīdāsa, and

stray verses on Mānaveda, Zamorin of Calicut, Vīramārtāṇḍa (probably a king of South Kerala) and Kola King (Kolattiri). It is obvious that the author belonged to Kerala. The absence of any reference to Melpputtūr Nārāyaṇa Bhaṭṭa, author of the *Prakriyāsarvasva*, the *Nārāyaṇīya* and the *Apāṇinīyapramāṇatā* seems to suggest an early date for the author; but the absence of any quotation from the dramas of Kulaśekhara Varman and the *Kṛṣṇavilāsa* of Sukumāra cannot be taken as an evidence of a much earlier date; the line '*kṣapayate kālaṃ sa dhanyo janaḥ*' from a popular verse traditionally ascribed to Uddaṇḍa Śāstrin is found quoted here, but there is no quotation from Uddaṇḍa's *Kokilasandeśa*. Taking into consideration all these things the Kerala author of the present work may be taken to have flourished during the fifteenth or sixteenth century A.D. The absence of any direct reference to the *Siddhāntakaumudī* of Bhaṭṭoji Dīkṣita corroborates this view.

The author who is an erudite scholar in Sanskrit grammar and a *sahṛdaya* quite familiar with the classical Sanskrit works besides the *Rāmāyaṇa*, the *Mahābhārata* and the *Bhāgavata*, takes a tolerant and generous view regarding the correctness of words in common usage, though not strictly sanctioned by Pāṇini, a view that is found later in Melpputtūr Nārāyaṇabhaṭṭa's *Prakriyāsarvasva* and defended in his *Apāṇinīyaprāmāṇya* (ed. E. R. Sreekrishna Sarma, *ORI*, Tirupati). He takes later grammarians like Bhartṛhari and Bhoja and poets like Murāri, Bhavabhūti and Kālidāsa as

authoritative. The general maxim *yathottaraṃ munīnāṃ prāmāṇyam* ('the later the sage, the more his authoritativeness'), usually applied to the three great grammarians, Pāṇini, Kātyāyana and Patañjali, is extended by our author to Bhartṛhari also (*ācāryāṇāṃ uttarottaraṃ prāmāṇyam ity āptasaṃvādaḥ*). Incidentally it may be noted that he takes the grammarian Bhartṛhari, author of the *Vākyapadīya* and the *Ṭīkā* commentary on the *Mahābhāṣya* (for the first three Pāda-s), as identical with the poet who wrote the *Subhāṣita-s*, and also with Bhaṭṭi, author of the grammatical poem *Rāvaṇavadha*; though supported by popular tradition these identifications have not yet been proved.

The work begins with a salutation to the speech principle, which is identified with Brahman as in the beginning of the *Vākyapadīya* (*anādinidhanaṃ brahma śabdatattvam*) and which is said to manifest itself in three forms (*Vaikharī*, *Madhyamā* and *Paśyantī*). This is in accordance with the *Vākyapadīya* view:

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥ (I. 134)

Sanskrit words are divided into *vaidika* and *laukika*, following Kātyāyana and Patañjali; but the term *laukika* 'popular' is explained, not as 'current in popular usage', but as 'known to the educated people well versed in Kāvya-s and Itihāsa-s'. This view is based on the explanation given in the *Kāśikā* and

indicates that Sanskrit had ceased to be a spoken language.

In the first section dealing with *saṃdhi* rules the author gives a few Kārikā-s giving general principles, but this method is dropped afterwards.

Regarding *saṃdhi* the author says that it depends on the intention of the speaker as in the case of the use of *kāraka-s*, and that even in verse this option should be given as in prose. *Visaṃdhi*, or lack of coalescence between words within each half a verse, is considered as a defect by the Ālaṃkārika-s even when it is not grammatically wrong as in the case of Pragṛhya-s (e.g. *kamale iva locane ime*). The present text rejects such strict rules but leaves it to the common sense of the poet.

In the course of the discussions many a subtle point regarding the nuances between expressions is indicated. Thus pointing out the difference between a compound word and a phrase expressing the same idea, the author quotes the view of Mahimabhaṭṭa that a compound word cannot indicate the pejorative or ameliorative implications of a part of it which in a phrase it can (*rāmasya bāhur asi* is more effective than *rāmabāhur asi*). Regarding the use of possessive suffixes to a Karmadhāraya compound, he says that though it seems redundant and unnecessary, it can be justified if the intention is to suggest praise, censure, etc.

There is a similar work dealing with the correctness of irregular words found in the *Rāmāyaṇa*, the *Mahābhārata* and the Purāṇa-s; it is also anonymous and might probably have been written by the author

of the *Mukhabhūṣaṇa* himself. In some cases it is found in the same codex containing the *Mukhabhūṣaṇa* and is at times referred to or described under that title itself. The correct title of that work seems to be *Ārṣaprayoga-sādhutvanirūpaṇa*. It is an independent work and begins with a few introductory verses:

‘ प्रणम्य परमात्मानं विमुक्तोपाधिविप्लवम् ।
इतिहासे पदं किंचिद् यथाशक्ति निरूप्यते ॥
नूनमार्षप्रयोगोऽयमित्येवोक्त्वाविहापतेत् ।
अपशब्दाशयत्वं वा मुग्धत्वं वा निजं भृशम् ॥
अभिनन्दितसूक्तस्य स्वयमेव स्वयंभुवा ।
वाल्मीकस्य मुनेर्वाचि कोऽवाच्यं वक्तुमर्हति ॥
अधीती शब्दशास्त्राणां षष्ठौ द्वैपायनो विभुः ।
कृती निजकृतौ कुर्यात् कथमेवापभाषणम् ॥.’

(MT. 4400a)

This work has not been included in the present edition.

The critical edition of the *Mukhabhūṣaṇa* presented here is primarily based on a paper transcript of a Malayalam palm-leaf manuscript belonging to the late Pandit V. Venkatarama Sarma. The transcript is in his own handwriting and is fairly accurate (No. TR 429). The original palm-leaf MS. and another paper transcript of it are available in the Madras Govt. Oriental MSS. Library (MT. 4400b). The palm-leaf MS. is much damaged; the paper transcript was compared with the Adyar MS., but was not of much help,

as it contained only some more scribal errors. I went to Trivandrum to collate the MSS. there. Though three MSS. are described in the *Descriptive Catalogue of the Curator's Collection* (TCD 518A, 519, 520), one is actually the *Ārṣaprayogasādhutvanirūpaṇa*, and of the other two, one is a paper transcript of the other palm-leaf MS. which is damaged. These two contain both the texts. The Adyar MS. was compared with the Trivandrum paper MS. and collations made. On comparison it is found that both the Trivandrum MSS. and the Madras MSS. are derived from the same model, containing the same omissions, etc. However a few lines missing in the Madras MSS. could be restored with the help of the Trivandrum MS.

Editing this interesting and important work was not an easy task. The author was a great scholar quite at home with all the classical Sanskrit texts, the Itihāsa-s and the *Bhāgavata Purāṇa*, besides all important grammatical works, texts on literary criticism, and even technical works like the *Līlāvatī*. To trace the various quotations to their original sources was very difficult. Even in the case of Vāmana's *Kāvyālaṃkārasūtravṛtti* which has been used as a basic source by our author, there has been no critical edition giving the sources of the quotations. Besides the author has quoted even from contemporary writers and stray verses popular in Kerala. In spite of my best attempt some quotations still remain untraced. Even in arriving at the correct text and in understanding the meaning, much time and energy had to be spent and help sought from all

available sources. Later texts like Bhaṭṭoji Dīkṣita's *Siddhāntakaumudī*, its commentaries and sub-commentaries, and commentaries on classical Sanskrit texts had to be consulted, along with works like the *Durghaṭa-vṛtti* for understanding the arguments. I have added some expository and comparative notes at the end to enable readers to understand the text properly.

I am thankful to Prof. V. Raghavan, Dr. E. R. Sreekrishna Sarma (S. V. University, Tirupati), Sri N. V. Krishna Warrior (Director, State Language Institute, Trivandrum) and other friends for help in arriving at the correct text and in tracing some of the rare quotations; to Prof. R. N. Sampath (Curator, Govt. Oriental MSS. Library, Madras) and Dr. K. Raghavan Pillai (Director, University MSS. Library, Trivandrum) for permission to make use of the MSS. of the text, to Dr. N. P. Unni (Reader in Sanskrit, Kerala University) and Mr. Nambutiri (MSS. Library, Trivandrum) for helping me in collating the Trivandrum MSS., and to the staff of the Adyar Library and Research Centre, especially Prof. A. A. Ramanathan, Pandit S. Anantaraman and Mr. K. T. Venkatarama Sarma, for assistance in the course of the printing of this work.

K. KUNJUNNI RAJA

ABBREVIATIONS

Amaru.	*Amaruśataka*
Bhāg.	*Bhāgavata*
Bhaṭṭi.	*Bhaṭṭikāvya*
KSV	*Kāvyālaṃkārasūtravṛtti*
Kum.	*Kumārasaṃbhava*
M.	Madras MSS.
MBh.	*Mahābhāṣya*
MBhā.	*Mahābhārata*
Megh.	*Meghadūta*
Nāg.	*Nāgānanda*
Q.	Quoted
Ragh.	*Raghuvaṃśa*
Rām.	*Rāmāyaṇa*
Śiś.	*Śiśupālavadha*
SK.	*Siddhāntakaumudī*
T.	Trivandrum MSS.
Yudh.	*Yudhiṣṭhiravijaya*

मुखभूषणम्

अथवा

रूपनिर्णयः

१. संधिविमर्शः

नित्यां ज्योतिर्मयीमेकां विग्रहत्रयशालिनीम् ।
परब्रह्मस्वरूपां तां परां वाचमुपास्महे ॥ १ ॥

इह खलु द्विविधाः शब्दाः लौकिका वैदिकाश्चेति । वेदे भवा वैदिकाः । यद्यपि लौकिकानां वेदेऽपि वृत्तिस्तथाप्यसाधारणवैदिकापेक्षया ते लौकिका इत्युच्यन्ते । लोक्यते शब्दार्थः पुरुषार्थो वात्रेति लोको वृद्धव्यवहारः । द्विविधा वृद्धा इतिहासज्ञाः काव्यज्ञाश्चेति । तेषां व्यवहारो वृद्धव्यवहारः । तत्र विदिता लौकिकाः । तत्र तावत् कविव्यवहारगोचराः केचन शब्दाः प्रक्रियाणां दुर्लक्षत्वाद् अपशब्दाभासतां प्रतिपन्नाः प्रतीतिस्खलनं सहृदयानामुत्पादयन्ति । किं च,

पुरुषस्य स्वविद्यायामर्थं वर्णयतः सतः ।
पदं प्रत्यनभिज्ञत्वं नैव शोभावहं भवेत् ॥ २ ॥

तस्मात् तेषां व्युत्पत्तिः किंचिन्निरूप्यते । यथा—

'सोढुं न तत्पूर्वमवर्णमीशे आलानिकं स्थाणुमिव द्विपेन्द्रः ।'[1]

[1] *Ragh.*, XIV. 38.

अत्रायादिसंध्यभावदर्शनादपशब्दप्रतीतिर्न कार्या। कथम्? 'संहितायाम्' (VI. 1. 72) इत्यस्मिन् सूत्रे विवक्षितायामिति ज्ञाप्यते। तेन विवक्षातस्तु संधिर्भवतीत्यर्थः सेत्स्यति। संहितैव संधिः। तेन तत्कार्यभूतो गुणादिरुच्यते। ततः 'एचोऽयवायावः' (VI. 1. 78) इत्यस्यायमर्थः—संहितायामिति वर्तते। एचः स्थाने यथासंख्यम् अय् अव् आय् आव् इत्येते आदेशा भवन्ति अचि परतः संहितायां विवक्षितायामिति। एतदनुसारेणात्र संधिर्न विवक्षितः। तेनायादेशो न भवति।

'विवक्षावशतः सोऽयं संधिः स्यात् कारकं यथा।
किं विसंधीति काव्येऽत्र प्रगृह्ये दूषणं न तत् ॥ ३ ॥' [1]

एवम्

'धिक् तां च तं च मदनं च इमां च मां च।' [2]

इत्यादौ।

[1] cf. Vāmana (*KSV*, Banaras, 1908), II. 2. 7, 8:

विरूपपदसंधिर्विसंधिः।
पदसंधिवैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं च।

It is the first type that is meant here. See also Vāmana, V. I. 2:

नित्यं संहितैकपदवत् पादेष्वर्धान्तवर्जम्।

[2] Bhartṛhari, *Subhāṣitasaṃgraha*, v. 311 (Kosambi's ed., Singhi Jain Series 23):

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं, स जनोऽन्यसक्तः।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥

'तस्य पुत्रोंऽशुमान्नाम असमञ्जस्य वीर्यवान् ।'[1]

अत्र दीर्घसंधिर्न विवक्षितः ।

'मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत् ।'[2]

अत्रापि गुणो न विवक्षितः ।[a]

'उग्रेण तपसा युक्तां ददौ शैलवरः सुताम् ।
रुद्रायाप्रतिरूपाय उमां लोकनमस्कृताम् ॥'[3]

इत्यत्र गुणः ।

'वासुकेश्च वचः श्रुत्वा एलापत्रोऽब्रवीदिदम् ।'[4]

(अत्र) वृद्धिर्न विवक्षिता ।[b]

'पृष्ठे अस्य समर्पितम्', अत्र पररूपत्वम् । (VI. 1. 94)

'षष्टिं पुत्रसहस्राणि अपरा जनयिष्यति ।'[5]

अत्र यणादेशो न विवक्षितो भवति, विकल्पितत्वात् । कथम्? 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (VI. 1. 127) । इकोऽसवर्णेऽचि शाकल्यस्य मतेन प्रकृत्या स्युः[c] । ह्रस्वश्च तस्येकः स्थाने भवति । आरम्भविधानसामर्थ्यादेव हि यणादेशेन सह विकल्पः । यथा वा रामोपाख्याने ।

[a] MSS. add: तस्य पुत्रोंऽशुमान्नाम असमञ्जस्य वीर्यवान् । अत्र दीर्घः ।
[b] T. omits: विवक्षिता.
[c] MSS.: स्यात् ।

[1] *Rām.*, 1. 38. 22.
[2] ibid., 1. 26. 33.
[3] ibid., 1. 35. 20.
[4] *MBhā.*, I. 34. 1.
[5] *Rām.*, I. 38. 8.

'जघान रामस्तांश्चापि आत्मनः प्रतिरूपकान् ।'[1]

अत्रापि यण्संधिर्न भवति ।

'एतस्मिन्नेव काले तु अम्बरीषं सुधार्मिकम् ।
यौवराज्येऽभिषेकार्थं प्रार्थयन्ति स्म मन्त्रिणः ॥'

इत्यादौ । जगन्नाथस्तुतौ[2] पुनः,

'गौरीपूर्णवपुर्गङ्गाकालिन्दीसङ्गमायितम् ।
स्वभूस्वयंभूवाशास्यं नमस्यामि त्रियम्बकम् ॥'

अत्र इकां यण्व्यवधानमचीति चान्द्रा वदन्ति । ततो दधियन्नं सुवर्ण भूवादयः इत्यादिप्रयोगाः साधवः सिद्धयन्ति । एवं 'त्रियम्बकं संयमिनं ददर्श[3]' इति ।

'त्रियम्बककुटुम्बिनीं त्रिपुरसुन्दरीमिन्दिरां
पुलिन्दपतिसुन्दरीं त्रिपुरभैरवीं भारतीम् ।'[4]

इत्यादि ।

'मुग्धे मुग्धतयैव नेतुमखिलं कालं किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरीकुरु प्रेयसि ।'[5]

'प्रथितगुणयशा गुणैर्विशिष्टः
परमऋषिः परमं जगाम हर्षम् ।'[6]

[1] *MBhā.*, III. 274. 11: (तांश्चान्यान्).
[2] Text not identified.
[3] *Kum.*, 3. 44.
[4] *Mūkapañcaśatī*, 5. 80; cf. also ibid., 5. 92: त्रियम्बककुटुम्बिनि ।
[5] *Amaru.*, 82.
[6] *Rām.*, I. 18. 57.

अत्र प्रकृतिभावः । कथम् ? 'ऋत्यकः' (VI. 1. 128.) ऋति परतोऽक् प्रकृत्या स्यात् शाकल्यस्य मतेन; ह्रस्वश्च तस्याकः स्थाने स्यात् । एवम्

'ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।'[1]

इत्यादौ;

'देवकीनाथ गोविन्द वासुदेव विभो इति ।
व्याहरद्रसनैषा मे विजरीहर्तु संततम् ॥'[2]

अत्रापि प्रकृतिभावः । 'संबुद्धौ शाकल्यस्येतावनार्षे' (I. 1. 16) । संबुद्धिनिमित्त ओकारः प्रगृह्यसंज्ञः स्यात् शाकल्यस्याचार्यस्य मतेन, अनार्षे अवैदिके इतिशब्दे परतः ।

'अथ मेऽभूत् शिरोदुःखं वने काष्ठानि छिन्दतः ।'[3]

अत्र 'छे च' (VI. 1. 73) इति तुगविवक्षितः ।

'एकछत्रां महीं कृत्स्नां यः पराक्रम्य शासति ।[4]
सोऽपि नैवातिवर्तेत कालं वेलामिवोदधिः ॥'

अत्रापि तथा तुङ् न विवक्षितः । अथवा विवक्षितोऽयम् । उभयथापि वृत्तभङ्गाभावात् । अनुष्टुभेऽस्मिन् पथ्यावक्त्रे वृत्ते चतुर्ष्वपि पादेषु द्वितीयस्याक्षरस्य गुरुत्वं च लघुत्वं च युक्तम् । क्वचित् वृत्तसौन्दर्याभावभीरुत्वात् क्वचित्

[1] *Rām.*, 1. 18. 8.

[2] Not traced. MSS: व्याहरेद्रसना ।

[3] *MBhā.*, III. 28. 2. 30: (°भिन्दतः).

[4] Not traced. cf. *MBhā.*, XII. 29. 36.: एकच्छत्रां महीं चक्रे जैत्रेणैकरथेन यः ।

वृत्तभङ्गभयाद् अन्यत्र आई[a] पल्लवितैरित्यादौ च वर्णस्वरूपश्रुतिहेतोः संधिर्न विवक्षितः ।

'वृत्तस्थितिं समालोच्य प्रायशः संहितादिषु ।
विवक्षाभावभावादिव्यावर्तनमिहेष्यते ॥ ४ ॥'

एतदेव वा चतुरश्रम् । संधेरविवक्षातो विवक्षायाः साधुतरत्वाद्, उच्चारणश्रुत्योः[b] सरसत्वाच्च ।

'अविशेषे सुखोच्चारमूलमिष्टं यतः कवेः ।
विशेषेऽपि च सूत्रत्वादचो ञ्णिति (7. 2. 115) शंसनम् ॥ ५ ॥'[1]

'अजयन् शात्रवान् मुख्यान् तथा त्वमपि जेष्यसि ।'[2]

अत्र 'नश्छव्यप्रशान्' (VIII. 3. 7) इति रुत्वमविवक्षितम् । तत्रापि हि 'तयोर्य्वावचि संहितायाम्' (VIII. 2. 108) इति वर्तते । रुत्वविवक्षायामपि वृत्तोच्चारणयोर्न किंचिद्वैरूप्यम् ।

'अज्ञातवासं वत्स्यन्तः शेषं वर्षं त्रयोदशम् ।'[3] अत्र 'मोऽनुस्वारः' (VIII. 3. 23) इत्यनुस्वारो न विवक्षितः । तद्विवक्षायां हि तद्भावे परसवर्णतायां[4] वा दुरुच्चारत्वम् ।

'चच्छर्द सद्योऽतिरुषा क्षतं बकस्तुण्डेन हन्तुं पुनरभ्यपद्यत ।'[5]

अत्र संहिता विवक्षणीयैव । संहिता च न सर्वत्र । तदुक्तम्—

a MSS. आरं. See *Laghustava*, 19.
b T. उच्चारश्रुत्योः.

1 The *sūtra* is: अचो ञ्णिति.
2 *MBhā.*, IV. App. 1. 48: (अजयञ्छात्रवान्).
3 ibid., III. 299. 1: (छन्ना for शेष).
4 By अनुस्वारस्य ययि परसवर्णः (VIII. 4. 58).
5 *Bhāg.*, X. 11. 50.

'संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥'

इति वचनादेकपदे संधिकार्यविकल्पस्यायुक्तत्वात् ।

एवम्

'सुखं स्वपुर्यां न्यवसद् द्वारकायां श्रियः पतिः ।
सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुङ्गवैः ॥' [1]

इत्यादौ । इह स्वपुर्यामित्यत्र यण्संधिर्नित्यः । द्वारकायामित्यत्र दीर्घसंधिर्नित्यः । पुङ्गवैरित्यत्र वृद्धिर्नित्या । न्यवसदित्यत्र धातूपसर्गयोरपि संधिर्नित्यः ।

'अस्माकं दयितासमागमसुखाभेदेन मोदेमही-
त्यश्रान्तं रजनीवियोगिपततां[a] जागर्ति यश्चेतसि ।
यामिन्यामहनि प्रतापतपनेनोदित्वरेणैव ते
सैषः संप्रति बोभवीतु सफलः श्रीकोलपृथ्वीपते[b] ॥'

अत्र तच्छब्दसंबन्धिनः सोर्लोपः स्यात् । कथम् ? 'सोऽचि लोपे चेत्पादपूरणम्' (VI. 1. 134) । स इत्यस्याचि परतः सोर्लोपो भवति, यदि लोपे पादपूरणम् । लोपे सति पादः पूर्यते । एष इति 'इषु इच्छायाम्' इत्यस्मात् घञन्तः, न एतच्छब्दप्रकृतिकः । अतः सुलोपाभावादेषः संप्रतीति भवति । एवं 'सैष राजा युधिष्ठिरः' [2] इत्यादौ ।

[a] T. वियोगपतिताम् ।
[b] M. सफलश्रीकोलपृथ्वीपतेः ।

[1] *Bhāg.*, X. 90. 1.
[2] 'सैष दाशरथी रामः सैष राजा युधिष्ठिरः ।
सैष कर्णो महात्यागी सैष भीमो महाबलः ॥' Q. in *Kāśikāvṛtti* (VI. 1. 134).

'मम चेतसि लोलम्बदम्पतीवाम्बुजे सदा ।
लक्ष्मीनारायणौ भातां सुमनःप्रीतिकारिणौ ॥'

अत्र 'मणीवादीनां प्रतिषेधो वक्तव्यः' (वा. I. 1. 11.)[1] इति प्रगृह्यत्वाभावात् सवर्णदीर्घः। इदं वचनं मुनित्रयविरुद्धत्वान्न प्रमाणमिति पदमञ्जरीकारः।[2] वेति पदच्छेदे सति तस्योपमार्थत्वे चेष्टसिद्धिरिति तस्याभिप्रायः।[3] 'मणीवोष्ट्रस्य लम्बेते'[4] इत्यत्रापि।

राजेन्दुरित्यत्र नलोपस्य 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' VIII. 2. 2) इति नियमात् सिद्धत्वेन गुणो भवति। एवं 'धामाधिपस्य' 'करीन्द्राणाम्' इत्यादि।

'तरुणं सर्षपशाकं नवोदनं पिच्छिलानि च दधीनि ।'[5]

अत्र लक्षणप्रतिपदोक्तन्यायेन वृद्धिं बाधित्वा शकन्ध्वादित्वात् पररूपत्वं भवति। यथा 'शुद्धोदनः' 'श्नसोरल्लोपः' (VI. 4. III) इति। वृत्तपारुष्यपरिहारार्थः। वैवक्षिकं चेदम्।

'न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति वा ।

[1] *Vārttika* under I. 1. 11 in *Kāśikāvṛtti*, which gives examples मणीव, दम्पतीव, जम्पतीव.

[2] Haradatta. cf. *Prauḍhamanoramā*, p. 123: मुनित्रयानुक्तत्वादप्रमाणमिति कैयटहरदत्तादयः।

[3] See *Medinī*: वं प्रचेतसि जानीयादिवार्थे च तदव्ययम्। Bhaṭṭoji adds other examples शात्रवं व पपुर्यशः *Ragh.*, IV. 42d (v. l. च); and कादम्बखण्डितदलानि व पङ्कजानि। loc. cit.

[4] *MBhā.*, XII. 171. 12.

[5] *Vṛttaratnākara*, I-11 (ed. reads नवौदनं); cd. अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति।

एतदेवानुशोचामि वयस्तस्यातिवर्तते ॥' [1]

अत्र स्या इति पदच्छेदः । त्यदृशब्दप्रकृतिस्तच्छब्दसमानार्थोऽयम् ।

इति मुखभूषणे संधिविमर्शो नाम प्रथमः परिच्छेदः

२. कारकविमर्शः

'शक्यमोषधिपतेर्नवोदयाः कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसंपुटैः कराः ॥' [2]

'शक्यं द्रष्टुं तदनु शयितः शेषपर्यङ्किकायाम्' [3] ।
शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधाने सामान्येनोपक्रमात् विशेषानपेक्षायाम् । अत्र भाष्यकारवचनं ज्ञापकम्, 'शक्यं च श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्' इति । [4] न चैकान्तिकः सामान्योपक्रमः । तेन 'शक्या भङ्क्तुं नभसि बिसिनीकन्दवच्चन्द्रपादाः' [5] इति च भवति । [6]

'इति चैनमुवाच दुःखिता सुहृदं पश्य वसन्त किं स्थितम् ।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ॥' [7]

[1] *Rām.*, VI. 5. 5: (वयोऽस्या ह्यतिवर्तते).
[2] *Kum.*, VIII. 62. (Q. by Vāmana, V. 2. 23).
[3] *Śukasandeśa*, 45.
[4] *MBh.*, 1. 1. 1.
[5] Q. by Vāmana, V. 2. 23.
[6] See Vāmana, V. 2. 23: शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात् । Also *Vṛtti* thereon.
[7] *Kum.*, IV. 27.

'णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने' (I. 3. 67) इत्यत्र (विशेष्योपमेयवत् विशेषणोपमानयोः विभक्तिलिङ्गवचनात्)[a] निर्दिश्यमानप्रतिनिर्दिश्यमानयोरन्यतरलिङ्गं भजन्ति सर्वनामानीति ज्ञाप्यते । तेनात्र तदिति तच्छब्दः सुहृदं परामृशति । प्रतिनिर्दिश्यमानलिङ्गत्वं च भजते ।[1]

'तवास्य नीलोत्पलहारिचक्षुषो मुखस्य तद्रेणुसमानगन्धिनः ।'[2]

'अथ शब्दानुशासनम् । केषां शब्दानाम्'[3] इति भाष्यकारवचनात् सर्वनाम्नानुसंधिर्वृत्तिच्छन्नस्येति ज्ञाप्यते । तेनात्र तच्छब्देन नीलोत्पलपरामर्शो युक्तः ।

'स मुखेन त्रिलोचनः' । 'येनाङ्गविकारः' (II. 3. 20) इत्यस्मिन् सूत्रे यथाङ्गानां हानिस्तथाधिक्यमपि विकार इति ज्ञाप्यते । तेन यथा 'अक्ष्णा काणः' इति भवति तथा 'मुखेन त्रिलोचनः'[4] इत्यपि भवति ॥

'इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।'[5]

अत्र इदमिति निपातः ।

'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' ।[6]

[a] Missing in M.

[1] Vāmana, V. 1. 11: 'सर्वनाम्नानुसंधिर्वृत्तिच्छन्नस्य ।'

[2] Q. by Vāmana, V. 1. 11. (v. l. तवापि नीलोत्पलपत्रचक्षुषो°).

[3] *MBh.*, 1. 1. 1.

[4] Q. by Vāmana, V. 2. 24: हानिवदाधिक्यमप्यङ्गानां विकारः ।

[5] *Uttararāmacarita*, I. 1.

[6] *Kum.*, II. 55. cf. *Durghaṭavṛtti*, p. 41; Vāmana, V. 2. 22: निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः । परिगणनस्य प्रायिकत्वात् । *Śabdenduśekhara* takes इष्यते as understood to explain it: छेत्तुमिष्यत इति यत् तदसाम्प्रतम् ।

'अनभिहिते' (II. 3. 1) इत्यत्र सूत्रे तिङ्कृत्तद्धितसमासैरिति परिगणनं कृतम्। तस्य प्रायिकत्वान्निपातेनाभिहिते कर्मणि कर्मविभक्तिर्न भवति, तेन विषवृक्ष इति भवति। एवं 'क्रमादमुं नारद इत्यबोधि सः'[1] इति।

'शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च।
सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे॥'[2]

अत्र कर्मविवक्षायां द्वितीया। 'अधीगर्थदयेशां कर्मणि' (II. 3. 52) इत्यत्र हि शेष इति वर्तते। 'षष्ठी शेषे' (II. 3. 50) इत्यत्र शेषग्रहणेन विवक्षातः कारकाणि भवन्तीति ज्ञाप्यते। तत्र हि कर्मादीनामविवक्षा शेष इत्युक्तम्।

'एवं ते पुरुषव्याघ्राः पाण्डवा मातृनन्दनाः।
स्मरन्तो मातरं धीरा बभूवुः शोकदुःखिताः॥'[3]

इत्यादौ। एवं दयत्यादौ द्रष्टव्यम्।[4]

'नीलमेघाश्रिता विद्युत् स्फुरन्ती प्रतिभाति मे।
स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी॥'[5]

अत्र पक्षे षष्ठी। 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' (वा. I. 4. 48) इत्यत्र अपिशब्दो विकल्पार्थः। एवम्

[1] *Śiś.*, I. 3; See also *Kum.*, V. 28: वदन्त्यपर्णेति च तां पुराविदः।

[2] *Kum.*, IV. 17.

[3] *MBhā.*, XV. 29. 1: (वीरा बभूवुर्भृशदुःखिताः). (readings not mentioned in critical ed.)

[4] *SK.*, सर्पिषो दयनम्।

[5] *Rām.*, IV. 28. 12. cf.: बुभुक्षितं न प्रतिभाति किंचित्।

'पाण्डवास्त्वभितो मातुर्धरण्यां सुषुपुस्तदा ।
उत्सृज्य सुमहार्हाणि शयनान्यासनानि च ॥'[1]

इत्यादौ ।

'यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु ।'[2]

अत्र संप्रदानत्वशङ्कैव नास्ति द्विषेरक्रोधाद्यर्थत्वात् । एनं खलु 'द्विष अप्रीतौ' इत्यप्रीतौ स्मरन्ति । जगन्नाथस्तुतौ,

'कैवल्यसाम्राज्यवशंवदायै स्पृहां दशायै विदधानि[a] कामम् ।
श्रीरामचन्द्र त्वदुदन्तरम्यां विकल्पकोटिं स्पृहयामि देव ॥'

अत्र स्पृहयतिकर्मण ईप्सिततमत्वे विवक्षिते द्वितीया, ईप्सितत्वे तु चतुर्थी ।

'न कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।'[3]

अत्र ऋतेशब्दयोगे द्वितीया । तथा च भोजसूत्रम्—'ऋते द्वितीया च' (III. 1. 245) । ऋतेशब्दयोगे द्वितीयाविभक्तिर्भवति । चकारात् पञ्चमी च । एवं 'भीममृते नाशङ्के'[4], 'तमृते पूजाः क्व मतिमता कल्यन्ते',[5]

'निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन' ।[6]
'गुरुपुत्रानृते सर्वानहं पश्यामि कांचन ।'[7]

a T. विदधातु.

[1] *MBhā.*, XV. 34. 3: (शयनानि नराधिप). cf. reading M.
[2] ibid., III. 13. 38.

[3] *Mahimnaḥstava*, v. 20b. (v.l. क्व कर्म). *Bālamanoramā* (on II. 3. 29) says 'क्व कर्मप्रध्वंसः फलति पुरुषाराधनमृते' इति शिवरहस्यान्तर्गतस्तुतिगतः प्रयोगस्त्वार्षः ।

[4] *Yudh.*, VI. 4: (भीममृते नाशङ्के कुर्युर्भुवि कीचकस्य नाशङ्के ।)
[5] ibid., III. 50: (संहर्ता कल्यन्ते तमृते पूजाः क्व मतिमता कल्यन्ते ।)
[6] *Rām.*, I. 25. 16.
[7] ibid., I. 57. 21.

'हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम् ॥'[1]

अत्र अग्नीनामधिकरणत्वं हविषः कर्मत्वं च विवक्षिते ।[a] 'हुत्वाग्निमाज्यादि-भिरग्निकल्पः'।[2] अत्राग्नेः कर्मत्वम् आज्यादीनां करणत्वं च विवक्षिते ।[a]

'इष्टं मे बहुभिर्यज्ञैर्दत्वा विप्रेषु दक्षिणाम् ।'[3]

अत्र दानक्रियाया विषयत्वेन विप्रा विवक्षिताः न तु संप्रदानत्वेन ।

'प्रणम्य शिरसा तस्मै प्रवृत्तिमभिगम्य च ।'[4]

अत्र तादर्थ्यं विवक्षितम् । अतश्चतुर्थी । अन्यथा द्वितीया स्यात् । एवं 'तस्मै प्रणिपत्य' इत्यादौ ।[5]

'कुन्तीमात ममाप्येतद्रोचते यद्वयं जले ।
सुहृज्जनवृताः पार्थ विहराम यथासुखम् ॥'[6]

अत्र 'मातुर्मातच् पुत्रार्थमर्हते' इति मातजादेशः ।[7] मातृशब्दस्य मातजादेशो भवति पूज्यपुत्रसंबोधने ।

[a] MSS.: विवक्ष्यते.

[1] *Ragh.*, I. 62.
[2] ibid., VII. 20.
[3] *MBhā.*, IX. 4. 26: (दत्ता विप्रेषु दक्षिणा; present reading not given in critical ed.).
[4] *Rām.*, VI. 65. 32. cf. *MBhā.* II. 11. 35 (b. प्रतियान्ति यथागतम् ।)
[5] cf. *Kum.*, III. 60 (तस्मै शशंस प्रणिपत्य नन्दी).
[6] *MBhā.*, I. 214. 16: (कुन्तीमातर्मम . . . विहरेम).
[7] *Vārttika.*, मातच्मातृकमातृषु वा। on VI. 1. 14: मातजादेश is sanctioned by this *Vārttika*. See also *MBh.* on VII. 3. 107 and *Prauḍhamanoramā*, p. 305.

ननु कुन्तीमातर्ममाप्येतदिति पाठे किं क्षतम्। न खलु मातजादेशो नियमेनैव स्यात्, यथा 'कुन्तीमातः कथमिमामापदं त्वमिहाप्तवान्' इति।[1] सत्यम्। किं तु यदि तावन्न वृत्तविरोधः, यदि च संध्यादिषु न दूषणम्, यदि च पूज्यता गम्यते ततो मातजादेशो युक्तः। विशेषशब्दस्य श्लाघ्यत्वात्। तथा चोक्तम्—

'यस्तु प्रयुङ्क्ते कुशलो विशेषे[a] शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥'[2]

इति॥

'नभसा मुदितेन्दुना तुलामुदितार्केण समारुरोह तत्।'[3]

इह सदृशसादृश्यवाचकौ द्वौ तुलाशब्दौ। तयोस्तु सदृशवाचकयोगे तृतीया-प्रतिषेधः, 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' (II. 3. 72) इति। 'कृष्णस्य तुला नास्ति' इति दर्शनात्। सादृश्यवाचितुलाशब्दयोगे तृतीयेष्यत[b] इति।

'गतानां तु द्विजातीनां मन्त्रिणस्तान् नराधिपः।
सर्जयित्वा स्वकं वेश्म प्रविवेश महाद्युतिः॥'[4]

a विशेषान् MS.

b cf. Mallinātha,: न च नभसा तुलामित्यत्र 'तुल्यार्थैः' इत्यादिना प्रतिषेधस्तृतीयायाः। तस्य सदृशवाचितुलाशब्दविषयत्वात्। 'कृष्णस्य तुला नास्ति' इति प्रयोगात्। अस्य च सादृश्यवाचित्वात्। See also *Kum.*, V. 34: तुलां यदारोहति दन्तवाससा। *Śiś.* I. 4: स्फुटोपमं भूतिसितेन शंभुना। *Durghaṭavṛtti* (p. 48) explains: सहविवक्षायां तृतीया।

1 *MBhā.*, III. 177. 2: (v.l. त्वमवाप्तवान्).
2 Q. in *MBh.*, I. 1. 1.
3 *Ragh.*, VIII. 15.
4 *Rām.*, I. 12. 22.

अत्र पौर्वापर्यलक्षणसंबन्धमात्रविवक्षायां षष्ठी, संबन्धविशेषस्य तु लक्ष्यलक्षण-भावस्य विवक्षायां 'यस्य च भावेन भावलक्षणम्' (II. 3. 37) इति सप्तमी स्यात्; '(तस्य) चिन्तयमानस्य मन्त्रिमध्ये महात्मनः' इत्यादौ[1]।

'कस्यचित्त्वथ कालस्य सुमाली नाम राक्षसः।
रसातलं मर्त्यलोकं चचार पिशिताशनः॥'[2]

इत्यादौ च।

'यदि पुत्रसहस्रं मे सर्वत्र सममेव मे।
दीनस्य तु तदा शक्र पुत्रस्याभ्यधिका कृपा॥'[3]

अत्रापि संबन्धमात्रे षष्ठी। विषयविषयिभावविवक्षायां हि पुत्रे इति सप्तमी स्यात्।

'राक्षसैरभिभूताः स्मो न शक्तास्तु प्रजापते।
स्वेषु वेश्मसु संस्थातुं भयात् तेषां दुरात्मनाम्॥'[4]

अत्रापि संबन्धमात्रं विवक्षितम्। भयहेतुत्वविवक्षायां पञ्चमी स्यात्।

'तेन विज्ञाप्यसे वीर सांप्रतं विश्रवःसुत।
तदेषा दीयतां तस्य याचमानस्य सामतः॥'[5]

अत्रापि संबन्धमात्रं विवक्षितम्। अन्यथा संप्रदानचतुर्थी स्यात्। अथवा पूजानुग्रहकाम्यानिमित्तात्मीयद्रव्यपरित्यागाभावान्न संप्रदानत्वम्।

[1] *Rām.*, I. 18. 37.
[2] ibid., VII. 9. 1.
[3] *MBhā.*, III. 10. 16.
[4] *Rām.*, VII. 6. 26. (Ms. and M. L. J. ed. स्म).
[5] ibid., VII. 11. 30.

'निवेद्यतां दाशरथेर्ऋषीनस्मान् समागतान् ।'[1]

अत्रापि तथा षष्ठी । तादर्थ्ये पुनश्चतुर्थी स्यात् । यथा—

'ततस्ते प्रत्यभिज्ञाय अर्जुनाय न्यवेदयन्' इति ।

'सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः ।'

अत्रापि तथा षष्ठी ।

'जननात् प्रभृति सदा भृशदुःखसमाक्रान्त हन्त शृणु चेतः ।
हरिमभि सकृदपि विरचितमनसामघमीषदपनोदम् ॥'

अत्रापि संबन्धमात्रं विवक्षितम् । अन्यथा 'न लोकाव्यय' (II. 3. 69) इत्यादिना निषेधात् तृतीया स्यात्, न तु विरचितमनसामिति ।

'यं समाश्रित्य ते राजन् स्थापितास्त्रिदशा वशे ।'[2]

अत्र तु त्वयेति समानार्थस्ते इति, निपातो वा स्यात् । 'तेमे टार्थे' इत्यव्यय-सूत्रम् ।[3]

'अथ दीर्घस्य कालस्य राजा पुरुमुवाच ह ।'[4]

अत्रापि तथैव षष्ठी । अन्यथा प्रकृत्यादितृतीया स्यात्[5] । 'अपवर्गे तृतीया' (II. 3. 6) नातीव युक्ता ।

[1] *Rām.*, VII. 1. 9.
[2] ibid., VII. 30. 6.
[3] *Nīpātāvyayopasargavṛtti* of Tilaka, I. 104.
[4] *Rām.*, VII. 59. 10: (पुरुमथाब्रवीत्).
[5] By 'प्रकृत्यादिभ्य उपसंख्यानम्', *vārttika* under II. 3. 18.

'तेषां समुपविष्टानां सर्वेषां दीनचेतसाम् ।
अश्रुपूर्णमुखो राम इदं वचनमब्रवीत् ॥'[1]

अत्रापि तदर्थस्य वचनक्रियाप्राप्यत्वं न विवक्षितम् । संबन्धमात्रमेव विवक्षितम्, निमित्तनिमित्तिरूपम् । अतः षष्ठी । यथाह । 'न माषाणामश्नीयात्' इति ।

'इष्टं संबन्धसामान्यं कर्मादेः क्रियया यदि ।
षष्ठी सर्वविभक्तीनां विषये भवति स्फुटम् ॥'

'मद्विशिष्टः पुमान् कोऽद्य शक्रो विष्णुरथाश्विनौ ।
मामतीत्य हि यस्य त्वं यासि भीरु न शोभनम् ॥'[2]

इत्यादौ ।

'प्रणम्य शिरसा तस्मै प्रवृत्तिमभिगम्य च ।'[a]

अत्र तादर्थ्यं विवक्षितम् । अतश्चतुर्थी, अन्यथा द्वितीया स्यात् ।

'सेवेत कामतः कामं तृप्तो वाजिकृतां हिमे ।'

इत्यत्र 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' (II. 2. 11) इति समासवचनं ज्ञापकम्, सुहितार्थेन योगे षष्ठी भवतीति । एवं 'सुहितेन वारिणः' इति ।

'स्कन्धात्प्रभृत्येव सपल्लवानि'[3]

'जन्मनः प्रभृति भुजङ्गपतीनश्नता'[4]

[a] T. प्रत्येक for प्रवृत्ति. cf. *Rām.*, II. 119. 12: प्रणम्य शिरसा तस्यै रामं त्वभिमुखी ययौ ।

[1] *Rām.*, VII. 45. 1 (cd: उवाच वाक्यं काकुत्स्थो मुखेन परिशुष्यता ।).
[2] ibid., VII. 26. 25-6 (यं च for यस्य).
[3] *Kum.*, III. 26.
[4] *Nāg.*, V. 14f.

अत्र ततः प्रभृतीति भाष्यकारवचनं ज्ञापकम्, प्रभृतिशब्दयोगे पञ्चमी भवतीति [1]। प्रभृतीत्यर्थग्रहणात् जन्मन आरभ्येत्यादि सिद्धं भवति। क्वचित् प्रभृत्यादिशब्दग्रहणाभावेऽपि भवति। यथा

'पितरीवाग्निसंस्कारात् पुनराववृते क्रिया।' [2]
'इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः।' [a] इत्यादि।

'प्रभृत्यन्यारादितरदिक्छब्दाञ्चूत्तरपदाजाहियोगे' (III. 1. 244) इति भोजसूत्रम्। तत्र खलु पञ्चमीति वर्तते। एवम्

'बाल्यात्प्रभृति दुष्टात्मा पापान्येव समाचरन्।' [3]

'मातामहमहाशैलं महस्तदपितामहम्।
कारणं जगतां वन्दे कण्ठस्योपरि वारणम्॥' [4]

अत्रोपरिशब्दयोगे पञ्चमी न भवति। 'षष्ठ्यतसर्थप्रत्ययेन' (II. 3. 30) इति षष्ठ्या युक्तत्वात्। तस्मात् कण्ठादुपरि वारणमित्यपपाठः। एवम् 'उपरागादुपरि पश्चादस्तमयात्' इत्यादयो द्रष्टव्याः। 'नवानधोऽधो बृहतः पयोधरान्' [5] इत्यादौ उपर्यादिषु शब्देषु सामीप्ये द्विरुक्तेषु 'उपर्यध्यधसः

[a] Missing in M.:
इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः।
तद्वत् सज्जनमैत्री विपरीतानां च विपरीता॥

[1] *MBh.*, under II. 3. 28: 'कार्तिक्याः प्रभृत्याग्रहायणी मासे' and Kaiyaṭa: तत आरभ्येत्यर्थः।
[2] *Ragh.*, XII. 56.
[3] *Rām.*, VII. 61. 18.
[4] Popular verse used at the beginning of texts.
[5] *Śiś.*, I. 4.

सामीप्ये' (VIII. 1. 7) इत्यनेन 'उपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु'[1] इति द्वितीया। वीप्सायां तु द्विरुक्तेषु षष्ठ्येव भवति। यथा

'उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः।'[2]

इति। 'मन्दं मन्दं नुदति पवनः'[3] इत्यत्र मन्दं मन्दमिति प्रकारार्थत्वे न भवति। प्रकारार्थत्वे तु 'प्रकारे गुणवचनस्य' (VIII. 1. 12) इति द्विर्वचने कृते कर्मधारयवद्भावे च मन्दमन्दमिति प्रयोगः। मन्दं मन्दमित्यत्र तु 'नित्यवीप्सयोः' (VIII. 1. 4) इति द्विर्वचनम्। अनेकभावाश्रयस्य हि नुदेर्यदा सर्वे भावा मन्दत्वेन व्याप्तुमिष्टा भवन्ति तदा वीप्सेति।

'निद्राद्रुक्कुकाद्रवेयच्छविरुपरिमुहुर्घर्घरो वारिवाहः।'[4]

अत्र निद्राद्रुगिति न भवति। भष्भावप्राप्तेः। अनुप्रासप्रियैस्त्वयमपभ्रंशः कृतः।

'निष्पन्दमृगमाश्रमम्'[5] इत्यत्र कस्कादिपाठात् षत्वम्। कस्कादिपाठोऽप्यस्य न निश्चित इति केचित्।[6]

'म्लायन्त्यङ्गुलिसङ्गेऽपि कोमलाः कुसुमस्रजः।'[7]

[1] By *Vārttika*: (I. 4. 48)
उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥

[2] *Jātakamālā*; *Durghaṭavṛtti* (Q. by Vāmana) defends it thus: उपरिबुद्धीनामुत्तरलबुद्धीनामुपरि [ऊर्ध्वमीश्वरबुद्धयः] चरन्तीत्यर्थः। एवं चाम्रेडितत्वाभावान्न द्वितीया। (p. 41).

[3] *Megha.*, I. 10; Q. by Vāmana, V. 2. 86.

[4] Q. by Vāmana, V. 2. 88. (°लसद्घर्घरो)

[5] *Ragh.*, XV. 37; Q. by Vāmana, V. 2. 89.

[6] Vāmana, V. 2. 88: निष्पन्द इति षत्वं चिन्त्यम्। (निष्यन्दः)

[7] Q. by Vāmana, V. 2. 89: नाङ्गुलिसङ्ग इति। मूर्धन्यविधेः।

अत्राङ्गुलिसङ्ग इति न युक्तम्। ‘समासेऽङ्गुलेः संगः’ (VIII. 3. 80) इति मूर्धन्यविधानात्; तेन ‘अवन्तिसेना’ ‘इन्दुसेना’ इत्येवमादयः प्रत्युक्ताः।[1] ‘सुषामादिषु च’ ‘एति संज्ञायामगात्’ (VIII. 3. 98, 99) इति मूर्धन्यविधानात्।

इन्द्रवाहनशब्दे ‘वाहनमाहितात्’ (VIII. 4. 8) इति णत्वं न भवति। आहितत्वस्याविवक्षितत्वात्। स्वस्वामिभावमात्रं ह्यत्र विवक्षितम्, तेन सिद्धमिष्टमिन्द्रवाहनमिति।[2]

‘धिक् त्वामुन्कन्तमत्रपम्’ (?) इत्यत्र प्रातिपदिकार्थे धिक्शब्दयोगाद् द्वितीयाविधानम्। अत्र धिक् गर्हामहे इति व्याख्यानं तु तात्पर्यकथनमेव। अतो ‘धिगहं मानुषं जन्म’[3] इति न युक्तम्। ‘धिगिदं मानुषं जन्म’ इति युक्तः पाठ.।

‘अलं रोदनेन’ ‘अलं प्रविस्तरेण’। अत्र करणे तृतीया। अत्र हि रोदनं प्राप्तकरणभावमेव प्रतिषेधेन संबध्यते। अतः सामर्थ्यादलमिति पर्याप्त्यर्थस्यैव ग्रहणं संपद्यते। ‘नमः स्वस्ति . . .’ (II. 3. 16) इत्यादिना चतुर्थी तु न भवति। ‘उपपदविभक्तेः कारकविभक्तिर्बलीयसी’ (प. II. 3. 16) इति न्यायात्। नास्ति घटोऽनुपलब्धेरित्यादौ[4] तु पञ्चमी योगविभागात् सिध्यति। ‘विभाषा गुणे’ (II. 3. 25) इति योगविभागः क्रियते[5]। तत्र योगविभागादिष्टसिद्धिरिति स्त्रियामपि भवत्येव।

[1] Vāmana, V. 2. 90: तेनावन्तिसेनादयः प्रत्युक्ताः।

[2] ibid., V. 2. 91: नेन्द्रवाहने णत्वम्, आहितत्वस्याविवक्षितत्वात्। He gives the example: ‘कुथेन नागेन्द्रमिवेन्द्रवाहनम्।’ *Śiś.*, I. 8.

[3] *Āścaryacūḍāmaṇi*, II. 11.

[4] ‘इह भूतले घटो नास्त्यनुपलब्धेः’। Q. in *Durghaṭavṛtti*, p. 45.

[5] In विभाषा गुणेऽस्त्रियाम् (II. 3. 25); the term अनुपलब्धेः is used in *MBh.* also. See also प्रकृतेस्त्वनुद्दिष्टेः in *MBh.* under III. 3. 1.

'स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे **पुराद्बहिः** ।'[1]

३. समासविमर्शः

'रामस्य बाहुरसि निर्भरगर्भखिन्न-
सीताप्रवासनपटोः करुणा कुतस्ते ।'[2]

अत्र व्यासेन बाहोर्नैपुण्यातिशयो व्यज्यते ।

'रामस्य वृत्तं मधुरं गायन्तौ मातुरग्रतः ।'[3]

अत्र वृत्तस्य माधुर्योपपत्तिर्दर्शिता ।

'वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किंनरस्वरौ ।'[4]

अत्र कृतेर्लोकोत्तरगुणगणपूर्णत्वं ध्वन्यते । अत्र 'षष्ठ्या आक्रोशे' (VI. 3. 21) इति षष्ठ्या अलुग्विधानं ज्ञापकम् । अत एव भोजसूत्रम्—'उत्तरपदार्थप्रधानस्तत्पुरुषः' (III. 3. 50) इति । अत्राह महिमा[5]

'संबन्धमात्रमर्थानां समासो ह्यवबोधयेत् ।
नोत्कर्षमपकर्षं वा वाक्यात्तूभयमप्यदः ॥'

इति ।

[1] *Ragh.*, VIII. 14. Further portions of this section are missing in MSS. The point discussed must be the पञ्चमीविभक्ति along with बहिः। See *SK*, (II. 3. 29) 'अपपरिबहिरञ्चवः पञ्चम्या' (II. 1. 12) इति समासविधानात् ज्ञापकाद् बहिर्योगे पञ्चमी । ग्रमाद् बहिः ।

[2] *Uttararāmacarita*, II. 10. (°विवासन°).

[3] *Ragh.*, XV. 34.

[4] ibid., XV. 64. (°स्वनौ)

[5] *Vyaktiviveka*, II. 17.

यथा शिवश्च शिवा च शिवौ, तथा रुद्रश्च रुद्राणी च रुद्रावित्यत्र प्रयोगे एकशेषोऽन्वेष्यः। 'पुमान् स्त्रिया' (I. 2. 67) इत्येकशेषः। स च न प्राप्नोति। तत्र हि तल्लक्षणश्चेदेव विशेष इत्यनुवर्तते। तत्रैव कारणात् स्त्रीपुंसकृत एव यदि विशेषो भवतीति व्यवस्थितेः। अत्र 'पुंयोगादाख्यायाम्' (IV. 1. 48) इति विशेषान्तरमप्यस्ति। एतेनेन्द्रौ भवौ शर्वावित्यादयः प्रयोगाः प्रत्युक्ताः।[1]

'अरण्यानीस्थानं फलनमितनैकद्रुमम्।'

अत्र निरनुबन्धस्य नशब्दस्य पदान्तरेण सह सुप्सुपा इति समासः। सानुबन्धस्य त्वनेकमिति रूपं स्यात्।[2]

'मधुपिपासुमधुव्रतसेवितं मुकुलजातमजृम्भत वीरुधाम्।'[3]

इत्यादिषु मधुपिपासुप्रभृतीनां समासो गमिगाम्यादिषु पिपासुप्रभृतीनां पाठात्। श्रितादिषु गमिगाम्यादीनाम् इति हि द्वितीयासमासः।[4]

'त्रिवली[5] (तरङ्गविषमे) . . . . ।'

अत्र त्रिवलीत्ययं शब्दः सिद्धः यदि संज्ञा, 'दिक्संख्ये संज्ञायाम्' (II. 1. 50) इति संज्ञायामेव समासवचनात्।

'बिम्बाधरबद्धतृष्णम्'[6] इत्यत्र बिम्बाधर इति बिम्बाकाराधरो बिम्बाधरः शाकपार्थिवादित्वान्मध्यमपदलोपी समासः।[7] 'उपमितं व्याघ्रादिभिः सामान्या-

[1] See Vāmana, V. 2. 1: रुद्रावित्येकशेषोऽन्वेष्यः and Vṛtti thereon.

[2] ibid., V. 2. 12: नैकशब्दः सुप्सुपेति समासात्।

[3] ibid., V. 2. 13: मधुपिपासुप्रभृतीनां समासो गमिगाम्यादिषु पाठात्।

[4] श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् (वा. II. 1. 24).

[5] *Ratnāvalī*, II. 11; Vāmana, V. 2. 14: त्रिवलीशब्दः सिद्धः संज्ञा चेत्।

[6] *Ragh.*, XIII. 16.

[7] Vāmana, V. 2. 15: बिम्बाधर इति वृत्तौ मध्यमपदलोपिन्याम्. See also *Vṛtti* thereon.

प्रयोगे' (II. 1. 56) इति समासे बिम्बमिवाधरोऽधरबिम्बमिति स्यात्। भोजसूत्रं तु—'बिम्बोष्ठबिम्बाधरपुरुषोत्तमादिषु परनिपातो वा' (III. 3. 60) इति परनिपातविकल्पविधायकम्। मुखचन्द्रादीनां समासे यत्र साम्यमात्रं विवक्षितं यथा—

'आताम्रतामपनयाम्यविलक्ष एष
लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना।
कोपोपरागजनितां तु मुखेन्दुबिम्बे
हर्तुं क्षमा यदि परं करुणा मयि स्यात्॥'[1]

तत्रोपमासमासः। यत्र तु सादृश्यमूल आरोपः, यथा—

'किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न वा[a]
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम्।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गतो[c]
दर्पः स्यादमृतेन [d]चेत्तदखिलं नन्वस्ति बिम्बाधरे॥'[2]

'पादाम्बुजं चूडितुम्' अत्रोपमासमासबाधकत्वे पारिशेष्यात् 'मयूरव्यंसकादयश्च' (II. 1. 72) इति समासः, इत्यालंकारिकाणां मतम्। अत एव खलु कश्चित्—

'श्रीमानवेदनृपतेर्मुखकमलं वसतिरागेण।
उपमेति वदति वाणी रूपकमिति सरसिजावासा॥'

इत्युक्तवान्।

[a] न किं; [c] शीतांशुरुज्जृम्भते; [d] चेदिह तदप्यस्त्येव.

[1] *Ratnāvalī*, III. 14.
[2] ibid., III. 13.

'अयमभूतपूर्वोदयः'[1] इत्यादौ पूर्वं भूतः भूतपूर्वः। 'भूतपूर्वे चरट्' (V. 3. 53) इति निर्देशात् पूर्वनिपातव्युत्क्रमो ज्ञाप्यते। 'भूतपूर्वादय·' (III. 2. 7) इति भोजसूत्रम्।

'सोऽहमाजन्मशुद्धानाम्'[2] इत्यादिषु 'मयूरव्यंसकादयश्च' (II. 1. 72) इति समासः। एवमामूललोलम् आमूलसरसं विस्पष्टपटु इत्यादि।[3]

'निचखानाधिकक्रुद्धः शरं सव्येतरे भुजे।'[4]

अत्र सव्य इतरो यस्मादिति बहुव्रीहिः। 'न बहुव्रीहौ' (I. 1. 29) इति सर्वनामसंज्ञाया अभावात् तत्कार्याभावः।

'तान्युञ्छषष्ठाङ्कितसैकतानि'[5] इत्यादिषु धान्यस्य षष्ठः धान्यषष्ठः, पूरणप्रत्ययान्तेन तद्धितान्तत्वात्, षष्ठो भागः षष्ठ इति 'पूरणात् भागे तीयादन्' (V. 3. 48) 'षष्ठाष्टमाभ्यां ञ च' (V. 3. 50) इति प्रत्ययविधानात् 'पूरणगुण . . .' (II. 2. 11) इत्यादिना षष्ठीसमासप्रतिषेधो न भवति।

दण्डी शूलोपरीति। शूलादुपरीत्यपपाठः। सर्वोपरि सर्वपश्चादिति भाष्यकारप्रयोगात् क्वचिदव्ययेन समासो भवतीति ज्ञाप्यते। 'सर्वपश्चात्प्रभृतीनि' (III. 2. 134) इति भोजसूत्रम्। तेनात्र पूरणेत्यादिना समासप्रतिषेधो न भवति।

[1] *Veṇīsaṃhāra*, III. 4 (v.l. °पूर्वः पुरः). [2] *Ragh.*, 1. 5.

[3] Vāmana, V. 2. 16: आमूललोलादिषु वृत्तिर्विस्पष्टपटुवत्। By मयूरव्यंसकादित्व.

[4] *Ragh.*, XII. 90.

[5] ibid., V. 8. Q. by Vāmana, V. 2. 17: न धान्यषष्ठादिषु षष्ठीसमासप्रतिषेधः। पूरणेनान्यतद्धितान्तत्वात्।

'पक्ष्मालीपिङ्गलिम्नः कण इव तटितां यस्य कृत्स्नः समूहः ।'[1]

अत्र गुणवचनेत्यादिना षष्ठीसमासप्रतिषेधो न भवति। तत्र हि गुणशब्देन शुक्लादयः स्वच्छमृदुप्रभृतयश्च विवक्षिताः न त्वतलाद्यन्ताः । तेन पटस्य शुक्लः पटस्य पटुः . . . . अत्रैव समासनिषेधः न त्विमनिजन्तेन। एवं पत्रपीतिमादिषु द्रष्टव्यम् ।

'इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।'[2]

अत्र 'छाया बाहुल्ये' (II. 4. 22) इत्येकवद्भावो न भवति । इक्षूणां शरदि संपन्नत्वात् प्रभूतच्छायस्यैकैकस्यापि मूले शालिगोपीनां निषदनौचित्यात् ।[3]

'सच्छास्त्रजन्मा हि विवेकलाभः ।'[4]

'सप्तमीविशेषणे बहुव्रीहौ' (II. 2. 35) इति सप्तम्याः पूर्वनिपातविधानात्, अवर्ज्यो व्यधिकरणो बहुव्रीहिः इति ज्ञाप्यते । तेन 'कण्ठप्रवृत्तयः प्राणाः'[5] इत्यादि सिद्धं भवति ।

'हस्ताग्रमाधुन्वती'।[6] अग्रहस्तम्, पुष्पाग्रम्, अग्रपुष्पम्, (इत्यादयः) गुणगुणिनोर्भेदाभेदाभ्याम्, गुणिनो भेदाद्धस्ताग्रादयः, अभेदादग्रहस्तादयः ।[7] आहिताग्न्यादिपाठेऽभ्युपगन्तव्ये तदनियमः स्यात् ।

[1] *Mālatīmādhava*, I. 4. Q. by Vāmana, V. 2. 18: पत्रपीतिमादिषु गुणवचनेन ।

[2] *Ragh.*, IV. 20.

[3] Mallinātha adopts the reading: °छायनिषादिन्यः. *SK*. explains the longer form thus: '"इक्षुच्छायानिषादिन्य" इति तु आ समन्तान्निषादिन्यः इत्याङ्प्रश्लेषो बोध्यः ।'

[4] Vāmana, V. 2. 19: अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः । Also *Vṛtti* thereon.

[5] Q. by Vāmana, ibid: (कान्तवृत्तयः).

[6] *Amaru.*, 36: संदष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती, etc. cf. *Kum.*, V. 63.: अथाग्रहस्ते मुकुलीकृताङ्गुलौ.

[7] Vāmana, V. 2. 20: हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात् ।

काष्ठतृणं तृणकाष्ठमिति यदृच्छया पूर्वनिपातं कुर्वन्ति। तत्रापभ्रंशो रक्ष्यः। अनित्यत्वज्ञापनं तु न सर्वविषयमिति।[1]

बहुव्रीहिप्रतिपत्तिकरः कर्मधारयो न प्रयोक्तव्यः।[2] यथा—अध्यासितश्चासौ तरुश्चेति अध्यासिततरुरिति। तेन विपर्ययोऽपि व्याख्यातः।[3] बहुव्रीहिरपि कर्मधारयप्रतिपत्तिकरो न प्रयोक्तव्यः। यथा वीराः पुरुषाः यस्य स वीरपुरुष इति।[4] कलो रवो यस्य स कलरव[5] इति।

क्वचिद्विशेष्यस्य प्रतिपत्तौ जातायां विशेषणमात्रस्यैव प्रयोगः। यथा—'निधानगर्भामिव सागराम्बराम्।'[6] अत्र हि पृथिव्या विशेषणमात्रमेव प्रयुक्तम्[7], सागराम्बरामिति। तेन

'क्रुद्धस्य तस्याथ पुरा पुरारेर्ललाटपट्टादुदगादुदर्चिः।'[8]

'शितिवाससस्तनुम्।'[9]

इत्यादयो व्याख्याताः।

क्वचित् संबन्धेन संबन्धे षष्ठीप्रयोगो दृश्यते। न सर्वत्र। यथा कमलस्य कन्द इति। कमलेन संबद्धा कमलिनी तस्याः कन्द इति संबन्धसंबन्धः।[10]

[1] Vāmana, V. 2. 21: पूर्वनिपातेऽपभ्रंशो रक्ष्यः।
[2] ibid., V. 1. 7: न कर्मधारयो बहुव्रीहिप्रतिपत्तिकरः।
[3] ibid., V. 1. 8: तेन विपर्ययो व्याख्यातः।
[4] वीरपुरुषकः (ग्रामः) is a proper Bahuvrīhi.
[5] cf. कलवेणुरवः कलायनीलः . . . रमतां मे हृदि देवकीकिशोरः।
[6] *Ragh.*, III. 9.
[7] Vāmana, V. 1. 10: विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ।
[8] Q. by Vāmana, ibid.: (पुरामरातेः).
[9] *Śiś.*, I. 6.
[10] Vāmana, V. 1. 12: संबन्धसंबन्धेऽपि षष्ठी क्वचित्।

'आयुषः कृमिकीटानामलंकरणमल्पता ।'[1]

इत्यत्र कृमिकीटानामिति प्रयोगो न युक्तः, 'क्षुद्रजन्तवः' (II. 4. 8) इत्येकवद्भावप्रसङ्गात् । न च मध्यमपदलोपी समासो युक्तः, तस्यासर्वविषयत्वात् ।[2] न खरोष्ट्रावुष्ट्रखरमिति पाठात् ।[3]

'कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।'[4]

इत्यत्र कर्मधारयान्मत्वर्थीयो नित्ययोगविवक्षणात् । यत्र मत्वर्थीया भूमादयो[5] न विवक्ष्यन्ते तत्र कर्मधारयमत्वर्थीयाभ्यां बहुव्रीहिर्लघुत्वात् प्रक्रमस्येति वचनप्रवृत्तिः । यथा 'बालप्रवालप्रतिमरुचिः' इति ।

'ततो वेलातटेनैव फलवत्पूगमालिना'[6] इत्यादि ।

'तस्य च वसुधामवतः काले कुलशेखरस्य वसुधामवतः ।'[7]

अत्र वसुरिव धामवान् वसुधामवान् । वसुरग्निरादित्यो वा ।

'तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः ।'[8]

[1] Q. by Vāmana, V. 2. 25.

[2] ibid., न कृमिकीटानामिति, एकवद्भावप्रसङ्गात् ।

[3] ibid., V. 2. 26, *Vṛtti*: 'खरोष्ट्रौ वाहनं येषाम्' इत्यत्र खरोष्ट्राविति प्रयोगो न युक्तः । गवाश्वप्रभृतिषूष्ट्रखरमिति पाठात् । (II. 4. 11)

[4] *Anargharāghava*, I. 1.

[5] 'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥'
Q. in *MBh.*, under V. 2. 94.

[6] *Ragh.*, IV. 44. Not in M. Mallinātha says: व्रीह्यादित्वादिनिप्रत्ययः ।

[7] *Yudh.*, I. 6.

[8] *Śākuntala*, II. 13.

अत्र षण्णां भागः षड्भागः। भागोंऽशः। भाग इत्येकवचनेन एको भाग इति सेत्स्यति। तेन षष्ठो भाग इत्यर्थो लभ्यते। एवं 'वर्णैरपि षडंशभाक्।'[1]

'पञ्चांशपादत्रिलवार्धषष्ठानेकीकृतान् ब्रूहि सखे त्वमाशु।
एभिश्च भागैरथ वर्जितानां किं स्यात् त्रयाणां कथयाशु शेषम्॥'[2]

'पञ्चांशोऽलिकुलात् कदम्बमगमत्'[3]

इत्यादि। एवं 'चतुर्भागे समुद्रस्य' इत्यादौ।

'कतिपयदिनस्थायिहंसा दशार्णाः।'[4]

अत्र 'कतिपयपुरस्वाम्ये पुंसाम्' इति[5] टीकाकारस्य भर्तृहरेः प्रयोगो ज्ञापयति, क्वचित् 'पोटायुवति . . .' (II. 1. 65) इत्यादिना कतिपयशब्दस्य पूर्वनिपातनियमोऽयमनित्य[6] इति। आचार्याणामुत्तरोत्तरं प्रामाण्यमित्याप्तसंवादः।

'प्रेम्णा शरीरार्धहरां हरस्य।'[7]

[1] *Ragh.*, XVII. 65. (MSS. वर्णैरिव).

[2] *Līlāvatī*, v. 38. (p. 35. ASS. ed.); (*b.* ममैतान् for त्वमाशु; but see MSS. ख, ग, घ).

[3] ibid., p. 53, v. 55.

[4] *Megh.*, I. 24.

[5] Bhartṛhari, *Subhāṣita*, III. 57:

विपुलहृदयैरीशैरेतज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः॥

[6] As in उदश्वित्कतिपयम् 'a little of butter milk mixed with water'.

[7] *Kum.*, I. 51.

'त्वया हृत्वा वामं वपुरनतितृप्तेन मनसा
शरीरार्धं शंभोरपरमपि शङ्के हृतमभूत् ।'[1]

अत्रार्धशब्दो यद्यपि समप्रविभागवाची तथाप्यत्र समांशत्वाविवक्षणात्[2] 'अर्धं नपुंसकम्' (II. 2. 2) इति समासाभावः। अत्र भोजसूत्रम्—'अर्धं समप्रविभागे वा' (III. 2. 121) इति । अर्धजरत्यादयो नियताः । तथा च भोजसूत्रम् 'अर्धजरतीयार्धवैशसार्धोक्त्यादयः' (III. 2. 122) इति ।

'विष्णोर्विश्वेश्वरस्य प्रवरशयनकृत् सर्वलोकैकधर्ता
सोऽनन्तः सर्वचेताः पृथुविमलयशाः सर्ववेदैश्च वेद्यः ।
पाता विश्वस्य शश्वत् सकलसुररिपुध्वंसनः पापहर्ता
सर्वज्ञः सर्वसाक्षी सकलविषभयात् पातु भोगीश्वरो नः ॥'[3]

'स्थितिकर्ता हि जगतो विष्णुरेव सनातनः ।'

इत्यादौ ;

'तारकं मे भवाम्भोधितारकं कृपया वद ।'

'अर्थव्यञ्जकः शब्दः' इत्यादौ च 'तृजकाभ्यां कर्तरि' (II. 2. 15) इति समासप्रतिषेधो न नियतः। 'जनिकर्तुः प्रकृतिः' (I. 4. 30) इत्याचार्यप्रवृत्तिर्ज्ञापयति क्वचित् तृचा सह समासो भवतीति । 'लक्ष्मीभर्तुर्भुजाग्रे'[4] 'उपादाय

[1] *Saundaryalaharī*, 23.

[2] cf. Mallinātha on *Kum.* 1. 50d 'प्रेम्णा शरीरार्धहरां हरस्य ।' अर्धं हरतीत्यर्धहरा । 'हरतेरनुद्यमनेऽच्' इत्यच्प्रत्ययः । शरीरस्यार्धहरां शरीरार्धहराम् । कुलधुरंधरादिवदवयवद्वारा समुदायविशेषकत्वात् समासः । अन्यथा त्वर्धस्य समप्रविभागवचनत्वादर्धशरीरेति स्यात् । For the normal use see *Kum.*, VII. 28: तया तु तस्यार्धशरीरभाजा पाश्चात्कृताः स्निग्धजनाशिषोऽपि ।

[3] *Viṣṇupādādikeśastotra*, v. 7 (ascribed to Śaṃkara).

[4] ibid., v. 1.

हविर्भोक्तुः' इत्यादौ संज्ञासमासः। 'तत्प्रयोजको हेतुश्च' (I. 4. 55) इत्यनेनाकेन सह समासो भवतीति ज्ञाप्यते।[1]

३. स्त्रीप्रत्ययविमर्शः

'अनुचरी प्रियतमा मदालसा',[2] पचादिषु चरडिति पठ्यते। तेन 'टिड्ढाणञ्...' (IV. I. 15) इत्यादिना ङीपि सति अनुचरीति भवति॥

'मन्दरस्य मदिराक्षि पार्श्वतो निम्ननाभि न भवन्ति निम्नगाः।
वासु वासुकिविकर्षणोद्भवा भामिनीह पदवी विभाव्यते॥'[3]

'इतो मनुष्यजातेः' (IV. I. 65) 'ऊङुतः' (IV. I. 66) इत्यत्र लक्ष्यानुसारेण मनुष्यजातेर्विवक्षा चाविवक्षा च भवति। तेन मनुष्यजातेर्विवक्षायाम् 'इतो मनुष्यजातेः' (IV. I. 65) इति ङीषि सति 'अम्बार्थनद्योर्ह्रस्वः' (VII. 3. 107) इति संबुद्धौ ह्रस्वत्वं सिद्ध्यति। अतो 'निम्ननाभि' इति स्यात्। तदविवक्षायां निम्ननाभे इति भवति। ननु इतश्च 'प्राण्यङ्गवाचिनो ङीष् वक्तव्यः' इति नाभिशब्दादीकारे कृते 'अम्बार्थनद्योर्ह्रस्वः' (VII. 3. 107) इति ह्रस्वत्वे च कृते 'निम्ननाभि' इति संबुद्धिः सिद्ध्यति, किमनेन यत्नेन? उच्यते—निम्ननाभीत्यत्र बहुव्रीहिसमासे

[1] cf., *SK*: 'घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः। शेषषष्ठ्या समास इति कैयटः।' (II. 2. 15)

[2] Q. by Vāmana, V. 2. 31: अनुचरीति चरेष्टित्वात्।

[3] ibid., V. 2. 47.

कृते 'नद्यृतश्च' (V. 4. 153) इति कपा समासान्तप्रत्ययेन 'न कपि' (VII. 4. 14) इति ह्रस्वत्वप्रतिषेधेन च भवितव्यम्।[1] ततश्च निम्ननाभीके इति स्यात् नतु निम्ननाभीति। तथा

'ह्रतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम्।'[2]

अत्र निमग्ननाभेरिति मनुष्यजातेरविवक्षेति ङीष् न कृतः। एवं

'सुतनु जहिहि कोपं पश्य पादानतं माम्।'[3]

इत्यत्र मनुष्यजातेर्विवक्षेति सुतनुशब्दादूङ् भवति। 'ऊङुतः' (IV. 1. 66) इत्यूङि सति पूर्ववत् ह्रस्वत्वे च 'सुतनु' इति प्रयोगः सिद्ध्यति। मनुष्यजातेरविवक्षायां 'सुतनो' इति प्रयोगः स्यात्।

'विमानना सुभ्रु कुतः पितुर्गृहे।'[4] 'ऊङुतः' (IV. 1. 66) इत्युकारान्तादूङ् विहित ऊकारान्तादपि क्वचिद् भवति। 'अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम्' (वा. IV. 1. 66) इत्यूकारान्तादप्यूङ्विधानात्। तपरकरणमविवक्षितम्, अलाबूः कर्कन्धूरित्युदाहरणम्। 'अप्राणिजातेश्चारज्ज्वादीनाम्' इत्यूकारान्तादप्यूङ्प्रत्ययारम्भात् तपरकरणमविवक्षितमिति ज्ञायते। तेनात्र सुभ्रुशब्दादपि मनुष्यजातिविवक्षायामूङ्प्रत्यये नदीसंज्ञायां संबुद्धौ ह्रस्वो भवति। ततः 'सुभ्रु' इति स्यात्। ऊङि त्वसति सुभ्रूरिति स्यात्॥[5]

[1] Vāmana, V. 2. 47: मनुष्यजातेर्विवक्षाविवक्षे; also Vṛtti thereon.

[2] *Vikramorvaśīya*, IV. 7; also quoted by Vāmana, loc. cit.

[3] Q. by Vāmana, loc. cit. अत्र मनुष्यजातेरविवक्षेत्यूङ् न कृतः।

[4] *Kum.*, V. 43. See Vāmana, V. 2. 48: 'ऊकारान्तादप्यूङ् प्रवृत्तेः' and *Vṛtti* thereon. He gives the example: सुभ्रु किं संभ्रमेण। cf. *Vikramorvaśīya*, III. 22: प्रसरति सुभ्रु ततः कृती भवेयम्। Also Bhaṭṭi, VI. 11: 'हा पितः क्वासि हे सुभ्रु।'

[5] cf. Mallinātha on *Kum.*, V. 43: सुभ्रु इत्यत्र भ्रूशब्दस्यैवोवङ्स्थानीयत्वाद् 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञाप्रतिषेधात् 'अम्बार्थनद्योर्ह्रस्वः' इति

'उपस्रोतःस्वस्थस्थितमहिषगोवर्गशबलाः
स्रवन्तीनां जाताः प्रमुदितविहङ्गास्तटभुवः ।'[1]
'भ्रमरोत्करकल्माषाः कुसुमानां समृद्धयः ।'

इत्यादौ 'अन्यतो ङीष्' (IV. I. 40) इति ङीष्विधानात् शबलकल्माषादिभ्यः स्त्रियां टाप्प्रत्ययस्याप्राप्तिः ।[2]

जानपदादि (IV. I. 42) सूत्रे वृत्तिकारेण 'नीलादोषधौ, प्राणिनि च' इति विषयव्यवस्थापनात् प्राणिनि विषये नीलशब्दात् ङीष्प्रत्ययः प्राप्तः । न तु टाप् । अतः प्राणिनि नीलेति न प्रयोक्तव्यम् ।[3]

ननु 'सा हि नाम[4] धनक्रीता प्राणेभ्योऽपि गरीयसी ।'

इति भाष्यकारप्रयोगात् ङीष् न नित्य इति ज्ञाप्यते ।[5] तेनात्र टाप् भवत्येव । नैवम् । व्युत्पत्तिभेदात् । कथम्? प्रथमं क्रीतशब्दात् टाप् । धनैः क्रीता धनक्रीता इति पुनर्न ङीष् प्रसज्यते । तथात्र व्युत्पत्तिभेदो नाश्रयणीयः, येन टाप् न भवति ।

इति स्त्रीप्रत्ययविमर्शः

ह्रस्वत्वं नास्ति । तेन ह्रस्वः प्रामादिक इति केचित् । 'अन्ये तु "अप्राणिजातेश्चारज्वादीनाम्" इत्यत्र अलाबूः कर्कन्धूः इत्युकारान्तादपि ऊङ्प्रत्ययमुदाजहार भाष्यकारः । एतस्मादेव ज्ञापकात् क्वचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वत्वमित्याहुः ।' अत एवाह वामनः 'ऊकारान्तादप्यूङ् प्रवृत्तेः' इति ।

[1] Q. by Vāmana, V. 2. 45: (v. l. महिषश्रृङ्गाग्रशबलाः) ।

[2] Vāmana, V. 2. 45: शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः । The correct forms accordingly are शबली, कल्माषी.

[3] See Vāmana, V. 2. 46: प्राणिनि नीलेति चिन्त्यम् and *Vṛtti* thereon.

[4] v. l., in *Kāśikā*: तस्य.

[5] See *Kāśikā* under *sūtra* IV. 1. 50: क्रीतात् करणपूर्वात्. The word धनक्रीता has to be taken as an exception to the rule: 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' (प. II. 2. 19) the exception being suggested by the *sūtra*, कर्तृकरणे कृता बहुलम् (II. 1. 32).

४. तद्धितविमर्शः

'तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ।'[1]

[ओर्गुणः (VI. 4. 146)][2] इत्यत्र गुणग्रहणं 'संज्ञापूर्वको विधिरनित्यः'[3] इति ज्ञापयति । तेनात्र गुणं बाधित्वा उवङादेशे स्वायंभुवमिति भवति ।'[4]

'रघूणामन्वयं वक्ष्ये'[5]। अत्र रघूणां रघ्वादीनामित्यर्थः । बहुवचनेन ह्याद्यर्थो लभ्यते[6] । यथा 'सप्तमी शौण्डैः' (II. 1. 40) 'अर्धर्चाः पुंसि च' (II. 4. 31) इत्यादौ[7] । रघूणामित्यपत्यबहुत्वोत्पन्नस्य तद्धितान्तप्रत्ययस्य 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' (II. 4. 62) इति लुक् । रघूणां रघोरपत्यानाम् अपत्यबहुत्वोत्पन्नस्य तद्धितान्तप्रत्ययस्य 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' (II. 4. 62) इति लुक् इति केनचिदुक्तम्[8] । तदसत् । अत्र हि रघूणां रघोरपत्यानामित्यर्थेनाजादीनामन्वयकथनं प्रतिज्ञातं स्यात् । तत्र रघोश्चरितं जन्मनः प्रभृति योगेन तनुत्यागपर्यन्तं वर्णितम् । ताभ्यामुभाभ्यां विरोधः ।[9] कथं चात्र तद्राजप्रत्ययः । न खलु 'द्व्यञ्मगधकलिङ्गसूरमसादण्'

[1] *Kum.*, II. 1.

[2] Missing in MSS.

[3] See *Paribhāṣenduśekhara*, 93; also *SK*, under: ओर्गुणः ।

[4] With *guṇa* the form will be: स्वायंभवम् ।

[5] *Ragh.*, I. 9.

[6] See *Tattvabodhinī*, under II. 7. 40: बहुवचननिर्देशात् गणपाठसामर्थ्याच्चाद्यर्थावगतिः ।

[7] MSS.: भृशमित्यादौ ।

[8] See also *Uttararāmacarita*, I. 17: जनकानां रघूणां च संबन्धः कस्य न प्रियः । Vīrarāghava's commentary: रघूणां रघुवंशोद्भूतानाम् । लाक्षणिकोऽयं शब्दः ।

[9] उभाभ्यां परस्परं विरोध इत्यर्थः ।

(IV. 1. 170) इति सूत्रेण स्यात्। रघुशब्दस्य जनपदशब्दत्वाभावात् क्षत्रियवाचित्वमेवास्ति, पुरुशब्दवत्। न खलु रघव इति कश्चिज्जनपदः श्रूयते, यथा इक्ष्वाकव इति।

'कार्तिकीयो नभस्वान्' इत्यत्र कार्तिके भव इति भावार्थत्वं वक्तुं युक्तम्। तथात्वे 'कालाट्ठञ्' (IV. 3. 11.) इति शैषिकेष्वर्थेषु विधीयमानष्ठञ् दुर्निवारतया प्राप्नोति।[1] अतः कार्तिकीय इति न सिध्यति। एवं शार्वरं तम[2] इत्यत्रापि।

शाश्वतं ज्योतिरित्यत्र शाश्वतमिति न सिध्यति।[3] 'कालाट्ठञ्' (IV. 3. 11) इति ठञ्प्रसङ्गात्। 'येषां च विरोधः शाश्वतिकः' (II. 4. 9) इति सूत्रकारस्यापि प्रयोगः। 'शाश्वते प्रतिषेध' इति वार्तिककारप्रयोगदर्शनात्, अत्राप्यण्प्रत्यये सति शाश्वतमिति च भवति।

'राजवंश्या गृहाय[4]' इत्यादौ राजवंश्याः सूर्यवंश्याः इत्यादौ वंशशब्दस्य दिगादिषु पाठात् 'दिगादिभ्यो यत्' (IV. 3. 54) इति भवार्थे [5]यत्प्रत्ययो विधीयते। स च वंशशब्दान्तान्न प्राप्नोति। 'ग्रहणवता प्रातिपदिकेन' इति तदन्तविधिप्रतिषेधात्[6]। साध्वर्थविवक्षायां तु 'तत्र साधुः' (IV. 4. 98) इति यत्प्रत्यये सति राजवंश्यादयः सिद्धाः।

[1] See Vāmana, V. 2. 49: कार्तिकीय इति ठञ् दुर्धरः।

[2] See *Kum.*, VIII. 58b: शार्वरस्य तमसो निषिद्धये। See also Vāmana, V. 2. 50: शार्वरमिति च।

[3] एवं . . . न सिध्यति। missing in M. See Vāmana, V. 2. 51: शाश्वतमिति प्रयुक्तेः। and *vṛtti* thereon.

[4] *Ragh.*, VII. 71d: न हि सति कुलधुर्ये सूर्यवंश्या गृहाय। (v. l. राजवंश्या ?). See Vāmana, V. 2. 52: राजवंश्यादयः साध्वर्थे सति भवन्ति।

[5] M.: भावार्थे; But see IV. 3. 53: तत्र भवः।

[6] *Paribhāṣā*: ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न। (V. 2. 87)

'**दारवं** पात्रम्' इत्यत्र दारुविकार इत्यस्मिन्नर्थे 'नित्यं वृद्धशरादिभ्यः' (IV. 3. 144) इति मयटो विधानात् दारुमयमिति प्रयोक्तव्यम्। न तु दारवमिति।[1] नन्वत्र विकारार्थो न विवक्षितः किंतु संबन्धसामान्यम्। अतः 'तस्येदम्' (IV. 3. 120) इत्यण्प्रत्यये सति दारवमिति भवति। मैवम्, संबन्धसामान्यविवक्षायामप्यण्प्रत्ययो न भवति। 'वृद्धाच्छः' (IV. 2. 114) इति छप्रत्ययप्रसङ्गादिति।

मुग्धिमा प्रौढिमा इत्यादौ 'पृथ्वादिभ्य इमनिज्वा' (V. 1. 122) इति इमनिच्प्रत्ययः प्रयुक्तः। स च मुग्धप्रौढादिशब्देभ्यो न भवति। तेषां पृथ्वादिष्वपाठात्।[2]

'सांनिध्ययोगात् किल तत्र शच्याः'[3] इत्यादौ **सांनिध्यम् औपम्य-** मित्यत्र

'चातुर्वर्ण्यादीनां स्वार्थे (उपसंख्यानम्)'[4]

इति स्वार्थिके ष्यञि **चातुर्वर्ण्यम् औपम्यं सांनि**ध्यमित्यादयः स्वार्थिकष्यञन्ताः।

ब्राह्मण्यमिति 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (V. 1. 124) इति ष्यञ् विधीयते। ततश्च ष्यञन्तेभ्यः स्त्रियाम्, 'षिद्गौरादिभ्यश्च' (IV. 1. 41) इति यो ङीष् विधीयते सः ईकारो बहुलं भवति।[5] क्वचिन्न भवति, क्वचिन्न प्रवर्तते, क्वचिद्विकल्पेन प्रवर्तते। ब्राह्मण्यादिषु न भवति। सामग्र्यमित्यादिषु विकल्पेन। **सामग्र्यं सामग्री, वैदग्ध्यं वैदग्धी**।[6]

[1] Cf. Vāmana, V. 2. 53: दारवशब्दो दुष्प्रयुक्तः and *Vṛtti* thereon.
[2] ibid., V. 2. 54: मुग्धिमादिष्विमनिज् मृग्यः, etc.
[3] *Ragh.*, VII. 3.
[4] *Vārttika* under, V. 1. 124.
[5] See Vāmana, V. 2. 56: ष्यञः षित्करणादीकारो बहुलम्।
[6] ibid., V. 2. 57.

'धन्विनौ चरणयोर्निपेततुः'[1] इत्यादौ धन्वशब्दस्य अदन्तत्वाभावात् 'अत इनिठनौ' (V. 2. 115) इति इनिप्रत्ययस्याप्राप्तौ, व्रीह्यादेराकृतिगणत्वात् इनिप्रत्यये सति[2] **धन्वीति** पदं सिध्यति।[3]

'घनतरं तमः' 'बहुतरं प्रेम'। अत्र न केवलं द्व्यर्थे विभज्ये चोपपदे शब्दोपात्ते प्रतियोगिन्यातिशायिनिकाः प्रत्यया भवन्ति[4], अपि तु द्व्यर्थादौ प्रतियोगिनि बुद्धिसंनिधापितेऽपि तरबादयो भवन्ति। तेन **घनतर**मित्यादिप्रयोगाः सिध्यन्ति।[5] **कौशिलः वासिलः,** अनुकम्पितः कौशिकः, अनुकम्पितो वासिष्ठः, इत्यस्मिन्नर्थे 'घनिलचौ च' (V. 3. 79) इति सूत्रेणानुकम्पायां नीतौ वा बह्वचो मनुष्यनाम्नः घनिलचौ प्रत्ययौ विधीयेते।[6] अतः कौशिकवासिष्ठशब्दाभ्यामुक्तलक्षणाभ्यामिलचि कृते 'ठाजादावूर्ध्वं द्वितीयादचः' (V. 3. 83) इत्यादौ प्रत्यये परतः प्रकृतेर्द्वितीयादचः परस्य शब्दे रूपस्य लोपे सति 'यस्येति च' (VI. 4. 148) इतीकारलोपे च कौशिलो वासिल इत्यादयः प्रयोगाः सिध्यन्तीति।[7]

मुक्तैव मौक्तिकम्। अत्र विनयादिपाठात् 'विनयादिभ्यष्ठक्' (V. 4. 34) इति स्वार्थिके ठकि कृते मौक्तिकमिति स्यात्।[8] स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपीति वचनात्[9] नपुंसकत्वम्। इदं वचनं

[1] *Ragh.*, XI. 4.
[2] Pāṇini, V. 2. 116: 'व्रीह्यादिभ्यश्च'।
[3] Vāmana, V. 1. 58: धन्वीति व्रीह्यादिषु पाठात्।
[4] Pāṇini, V. 3. 57: द्विवचनविभज्योपपदे तरबीयसुनौ।
[5] Vāmana, V. 2. 60: बौद्धप्रतियोग्यपेक्षायामप्यातिशायनिकाः।
[6] Cf. Pāṇini, V. 3. 76-8: अनुकम्पायाम्, नीतौ च तद्युक्तात्, बह्वचो मनुष्यनाम्नष्ठज्वा।
[7] *Vāmana*, V. 2. 61: कौशिलादय इलचि वर्णलोपात्। and Vṛtti thereon.
[8] ibid., V. 2. 62: मौक्तिकमिति विनयादिपाठात्।
[9] See *Kāśikāvṛtti* under V. 4. 14.

'णचः स्त्रियामञ्' (V. 4. 14) इत्यत्र स्त्रीग्रहणेन ज्ञाप्यते। अपि-शब्दान्नातिवर्तन्ते। यथा—

'बहुचन्द्रिकया[1] यशसा धवलेऽस्मिन् जगति वीरमार्ताण्ड।
यानगृहबहललाभात् त्रिमूर्तयः प्रमदमायान्ति॥'

कल्पबादयः स्वार्थिका इति तत्रोच्यते॥

रक्ष एव **राक्षसः**। मरुदेव **मारुतः**। मन एव **मानसम्**। अत्र 'प्रज्ञादिभ्यश्च' (V. 4. 38) इति स्वार्थिकोऽण् विधीयते। रक्षःप्रभृतीनामत्र पाठाभ्युपगमेन स्वार्थिकाण्प्रत्यये कृते राक्षसः इत्यादयः सिध्यन्ति। एवं **प्रातिभं वैकृतं द्वैतं**[a] **चारित्र**मित्यादयो बहवः प्रयोगाः सिद्धा भवन्ति।[2]

५. समासान्तविधिविमर्शः

'मधु सरजसं मध्येपद्मं पिबन्ति शिलीमुखाः।'[3]

[a] not in M.

[1] बहुचन्द्रिका is by Pāṇini, V. 3. 68: विभाषा सुपो बहुच् पुरस्तात्तु। (ईषदूना चन्द्रिका बहुचन्द्रिका।) Regarding प्रकृतिलिङ्गता see 'स्यादीषदसमाप्तौ तु बहुच् प्रकृतिलिङ्गता।'

[2] Vāmana, V. 2. 64: प्रातिभादयः प्रज्ञादिषु।

[3] Q. by Vāmana under V. 2. 64: न सरजसमित्यनव्ययीभावे। 'मधु सरजसं मध्येपद्मं पिबन्ति शिलीमुखाः' इत्यादिषु सरजसमिति न युक्तः प्रयोगोऽनव्ययीभावे। अव्ययीभाव एव सरजसशब्दस्येष्टत्वात्। Cf. *Śiś.*, VI. 47: कनकभङ्गपिशङ्गदलैर्दधे सरजसारुणकेसरचारुभिः। Also VII. 42: सरजसमकरन्दनिर्भरासु।

अत्र सरजसमित्यनव्ययीभावे प्रयोगो न युक्तः। रजसा सह वर्तत इति सरजसमिति बहुव्रीहिसमासो न सिध्यति। तस्मिन् हि सति सरजस्कमिति स्यात्। अव्ययीभावे तु सिध्यति। 'अव्ययं विभक्तिसमीप°' (II. 1. 6) इत्यादिना साकल्यार्थेऽव्ययीभावे कृते अचतुरादि सूत्रेण (V. 4. 77) अकारान्तत्वनिपातनात् सरजसमिति भवति। तथा चाह वृत्तिकारः[1]—तत्र एकोऽव्ययीभावः साकल्ये। सरजसमभ्यवहरतीति, बहुव्रीहौ न भवति। सह रजसा वर्तते सरजस्कं पङ्कजमिति।[2]..........

'धृतधनुषि शौर्यशालिनि' इत्यत्र धृतधनुषीत्यसंज्ञायां न युक्तः प्रयोगः।[3] 'धनुषश्च' (V. 4. 132) इति नित्यमनङ्विधानात्। संज्ञायामप्यनङ्विकल्पः, 'वा संज्ञायाम्' (V. 4. 133) इति।

दुर्गन्धिः काय इत्यत्र 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (V. 4. 135) इत्युदादिभ्यश्चतुर्भ्यः परस्य गन्धशब्दस्य समासान्तविधानादुदादिषु दुरो ग्रहणाभावाद् दुर्गन्धिरिति प्रयोगो न साधुः।[4] 'सा दक्षरोषात् सुदती ससर्ज।'[5] देवानां वयोऽवस्थाविशेषाभावाद् वयस्यविवक्षिते दत्रादेशप्राप्तेरभावात् सुदतीशब्दो व्युत्पादनीयः[6]। कथं? 'अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च'

[1] See *Kāśikāvṛtti* under V. 4. 77.

[2] 'सरजः पङ्कजम्' is also possible in Bahuvrīhi.

[3] Cf. Vāmana, V. 2. 65: न धृतधनुषीत्यसंज्ञायाम्। *Anargharāghava*, II. 63: भगवन् कौशिक पश्य पुरस्तादार्ये धृतधनुषि ...; Bhaṭṭi, I. 24: तं पृष्ठतः प्रष्ठमियाय नम्रो हिंस्रेषु दीप्रास्त्रधनुः कुमारः; *Uttararāmacarita*, V. 4: धृतधनुषं रघुनन्दनं स्मरामि। These are explained by समासान्तविधेरनित्यत्वम्।

[4] ibid., V. 2. 66: 'दुर्गन्धिपद इद् दुर्लभः।' दुर्गन्धिः काय इत्यादिषु दुर्गन्धिपदे इत् समासान्तो दुर्लभः उत्पूत्यादिषु दुःशब्दस्यापाठात्।

[5] *Kum.*, I. 53.

[6] See Vāmana, V. 2. 67: सुदत्यादयः प्रतिविधेयाः। and its Vṛtti. दत्रादेश is by V. 4. 141 'वयसि दन्तस्य दतृ।'

(V. 4. 145) इति सूत्रे[a] चकारस्यानुक्तसमुच्चयार्थत्वात् अहिदन्नित्यादिष्विव दत्रादेशे 'उगितश्च' (IV. 1. 6) इति ङीपि सति, सुदतीति सिध्यतीत्येके। अन्ये तु वर्णयन्ति[b] सुदत्यादयः स्त्र्यभिधायिनो योगरूढिशब्दाः[1]। तेषु 'स्त्रियां संज्ञायाम्' (V. 4. 143) इति दत्रादेशो विकल्पेन सिद्धः, तेन 'शिखरदति पतति रशना' इत्यादि[2] सिद्धम्। सुदतीत्यत्र वयोवस्थया देवं प्रति देव्या अपर्याप्तभुक्तत्वं लक्ष्यते। तच्च निर्वेदकारणमिति कश्चित्सुधीः[3]। तत्पक्षे 'वयसि दन्तस्य दतृ' (V. 4. 141) इत्यनेनैव दत्रादेशः।

'प्लवङ्गनखकोटिभिः क्षतदृढोरसो राक्षसाः।'[4]

अत्र 'उरः प्रभृतिभ्यः कप्' (V. 4. 151) इति कप् न कृतः। 'ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्।'[5] तथा च विग्रहवाक्यमेवं कर्तव्यम्। दृढं च तदुरश्च दृढोरः, क्षतं दृढोरो येषामिति। अतः क्षतदृढोरस इति सिध्यति।

अथवा 'द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' (VI. 2. 197) इत्यत्र 'समासान्तविधिरनित्यः' इति ज्ञाप्यते[6]। तेन कप्प्रत्ययो न भवति॥

सौहृदं दौर्हृदम्। शोभनं हृदयं यस्य, दुष्टं हृदयं यस्येति विग्रहे सिद्धाभ्यां सुहृदयदुर्हृदयशब्दाभ्यां भावार्थे 'हायनान्तयुवादिभ्योऽण्' (V. 1. 130)

[a] T. अग्रान्तादिसूत्रे।
[b] T. omits तु वर्णयन्ति।

[1] cf. *Naiṣadha,* II. 77: सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया where सुदती is used in the sense of a woman.
[2] MSS. give: शिखरिदशना but see Vāmana, loc. cit.
[3] Some commentator on *Kum.*
[4] Q. by Vāmana, V. 2. 68: क्षतदृढोरस इति न कप्। तदन्तविधिप्रतिषेधात्। See also *Vṛtti.*
[5] तदन्तविधेः प्रतिषेधात् in Vāmana's *Vṛtti.*
[6] See *MBh.* under VI. 2. 197.

इत्यणि कृते 'हृदयस्य हृल्लेखयदण्लासेषु' (VI. 3. 50) इति हृदादेशे 'तद्धितेष्वचामादेः' (VII. 2. 117) इत्यादिवृद्धौ च सत्यां, सौहृददौर्हृदशब्दौ सिद्धौ स्याताम्। अत्र हृच्छब्दस्य लाक्षणिकत्वात् 'हृद्भगसिन्ध्वन्ते (पूर्वपदस्य च)' (VII. 3. 19) इत्यत्र प्रतिपदोक्तस्य ग्रहणात् उभयपदवृद्ध्यभावः। शोभनं हृद् यस्य, दुष्टं हृद् यस्येति विग्रहे युवादिपाठादणि कृते 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धौ सौहार्दं दौर्हार्दमिति च सिद्धम्।[1]

६. तिङन्तविमर्शः

'मिलन्ति वाचः,' 'जगदिदमहो विक्लबयते,'[2] 'क्षपयते कालं स धन्यो जनः'।[3] अत्र मिलक्लविक्षपिप्रभृतीनां धातुगणेष्वपठितानामपि

[1] See Vāmana, V. 2. 83.

[2] कपाले मार्जारः पय इति करान् लेढि शशिनः
तरुच्छिद्रप्रोतान् बिसमिति करी संकलयति।
रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विक्लवयति॥

(v.l. विप्लवयति, विभ्रमयति). *Śārṅgadharapaddhati* (3640). Q. also in *Kāvyaprakāśa*, X 46.

[3] स्वस्मिन् वेश्मनि पूर्णवेश्मविभवे पूज्यान् समाराधयन्
प्रेयस्या गुणपूर्णया गुणवता पुत्रेण मित्रेण च।
सार्धं प्रावृषि केरलेषु निवसन् प्रीत्या समाकर्णयन्
लीलां राघवकृष्णयोः क्षपयते कालं स धन्यो जनः॥

Popular verse attributed to Uddaṇḍa Śāstrin (See *Contribution of Kerala to Sanskrit Literature*, Madras, 1958).

धातुत्वमस्ति । धातुगणस्यापरिसमाप्तेः ।[1] 'वर्धते धातुगणः' इति हि शब्दविद आचक्षते । तेनैषां गणपाठेऽनुमतिरिति शिष्टप्रयोगात् । अन्यत्राप्युक्तं 'परिपठितापरिपठितप्रत्ययनामादिभेदेन षोढा धातवः' इति । 'स वाह्यते राजपथः शिवाभिः ।'[2] अत्र वाहिरपरिपठितो धातुरङ्गसंमर्दने वर्तते ।

'तदर्हाय तद् ददध्वं सन्तः सत्यानृशंस्यतः ।'[3]

अत्र भौवादिकस्य 'दद दाने' इत्यस्य प्रयोगः । न तु दाञः श्लुविकरणस्य ।[4] तस्य हि दध्वमिति रूपम् ।

'अनृते च प्रसक्तस्ते न श्रद्धसि च स्वयम् ।'[5]

अत्रापि भौवादिकस्य 'दध धारणे' इत्यस्य रूपम् ।

'स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ।'[6]

इत्यादौ क्रियाफलप्राप्त्यभावेऽपि आत्मनेपदम् । एवम्

[1] Vāmana, V. 2. 2: मिलिक्लविक्षपिप्रभृतीनां धातुत्वम्, धातुगणस्यापरिसमाप्तेः । cf. *Kṣīrataraṅgiṇī*, p. 198: बहुलमेतन्निदर्शनम् । यदेतद् भवत्यादि धातुपरिगणनं तद्बाहुल्येन निदर्शनत्वेन ज्ञेयम् । तेनापठिता मिलिक्लविप्रभृतयो लौकिकाः . . . धातव उदाहार्याः । वर्धते हि धातुगणः । तथा च भोजः,

मिलन्त्याशासु जीमूता विक्लवन्ते दिवि ग्रहाः ।
तपः क्षपयति प्रावृट् क्षीयन्ते कामिविग्रहाः ॥ etc.

[2] *Ragh.*, XVI. 12. cf. Mallinātha: वहेरन्यो वहिधातुरस्तीत्युपदेशः ।

[3] The root दद in Bhvādi is sometimes used in the sense of धारण also. See *Prakriyāsarvasva*: दद दाने । धारणे चेति द्रमे । ददते मुक्तिं वेणुं च । Yāska also refers to this sense and gives the example: अक्रूरो ददते मणिम् । *Nirukta*, II. 2. cf. *Kṣīrataraṅgiṇī*, p. 8.

[4] 'डु दाञ् दाने' (जुहोत्यादि).

[5] *MBhā.*, I. 69. 26 (अनृते चेत् प्रसक्तस्ते श्रद्दधासि न चेत् स्वयम्).

[6] *Kum.*, III. 33.

'अयाचं तमहं विप्रं शापस्यान्तो भवेदिति ।'[1]

'सोऽयजत् पृथिवीपालः क्रतुभिर्भूरिदक्षिणैः ।'[2]

'शुश्रूषुराचार्यवशानुवर्ती दीर्घं कालं ह्यध्ययनं चकार ।'[3]

अत्र कर्तुः क्रियाफलप्राप्तिर्न विवक्षिता । अतः परस्मैपदम् ।

'न विश्वसेदविश्वस्तं विश्वस्तं नातिविश्वसेत् ।'[4]

श्वसितीति श्वसः । पचाद्यच् । तदन्तात् 'सर्वप्रातिपदिकेभ्य इत्येके' इति क्विप् । क्विबन्ता धातुत्वं न जहतीति धातुत्वात् शप् । लिङ् विश्वसेत् । अथवा गणकार्यस्यानित्यत्वात् शबपि भवतीति केचित् । एवं 'आर्यः को विश्वसेत् प्राज्ञः ।'[5]

'जगत्कुसुमसंतानवसन्तो भृशसंततः ।
कृपातोयधिवीचीभिर्दातु देवः सुखानि वः ॥'

अत्र श्लुविकरणस्यानित्यत्वात् लुक् न स्यात् । 'लज्जालोलं वलन्ते' इत्यादिषु प्रयोगेषु यदात्मनेपदं दृश्यते तदनित्यम्, ज्ञापकात् ।[6] तत्कथम् ? चक्षिङो द्व्यनुबन्धकरणम् । चक्षिङ इकारेणैवानुदात्तेन सिद्धेऽप्यात्मनेपदे यद् ङित्करणं

[1] *MBhā.*, III. 178. 39.

[2] ibid., III. 126. 5.

[3] ibid., III. 132. 6.

[4] *Cāṇakya-rājanīti*, ALS 92, v. 124. Cf. *Pañcatantra*: न विश्वसेत् पूर्वविरोधितस्य । and Bhaṭṭi: आश्वसेयुर्निशाचराः । XIX. 21 (v. l. आश्वस्युः). *Durghaṭavṛtti* says (p. 53): पचाद्यजन्तादाचारे क्विपि लिङि रूपम् । 'गणकार्यमनित्यम्' इति जयमङ्गला । भूवादेराकृतिगणत्वात् तत्र द्रष्टव्य इति ।

[5] *Rām.*, IV. 55. 7 (विश्वसेज्जातु).

[6] Vāmana, V. 2. 3. वलेरात्मनेपदमनित्यं ज्ञापकात् । *Vṛtti* quotes as example लज्जालोलं वलन्ती ।

कृतं तदनुदात्तेत्वनिबन्धनस्यात्मनेपदस्यानित्यत्वं ज्ञापयति।[1] तेन विदि-भर्त्सितर्जिप्रभृतीनां परस्मैपदं भवति। आवेदयति भर्त्सयति तर्जयतीत्यादि।[2] 'ये विद्यन्तेऽत्र नैव' इत्यादौ कर्मकर्तरि द्रष्टव्यं, न कर्तरि; अदैवादि-कत्वात्।[3] 'क्षीयते' इति च कर्मकर्तरि द्रष्टव्यम्, अनात्मनेपदित्वात्।[4]

'मार्गन्तां देहभारान्' इत्यादौ चुरादौ 'मार्ग अन्वेषणे' इति पठ्यते। 'आधृषाद्वा' (ग. सू. VII. 4. 2) इति विकल्पितणिच्कः। तस्मादात्मनेपदं दृश्यते। तदलक्षणं, परस्मैपदित्वान्मार्गेः।[5] यथा—'करकिसलयं धूत्वा धूत्वा विमार्गति वाससी'[6] इति।

लोलमानो वेल्लमान इत्यादयश्चानशि द्रष्टव्याः।[7] शानचस्त्वभावः परस्मैपदित्वाद्धातूनाम्।[8]

'दीर्घिकासु कुमुदानि विकासं लम्भयन्ति शिशिराः शशिभासः।'[9]

अस्त्ययं लभिः यः प्राप्त्युपसर्जनां गतिमाह। अस्ति च गत्युपसर्जनां प्राप्तिमाह। पूर्वस्मिन् पक्षे गत्यर्थत्वाल्लभेर्णिचि अणौ यः कर्ता तस्य गत्यादिसूत्रेण (I. 4. 52)

[1] Vāmana, V. 2. 4: चक्षिङो द्व्यनुबन्धकरणम्। See *Paribhāṣā*: अनु-दात्तेत्त्वनिमित्तमात्मनेपदमनित्यम्। This is not given in *Bhāṣya*.

[2] ibid. *Vṛtti*. See also *Kṣīrataraṅgiṇī*, p. 180: लक्ष्ये भर्त्सयति तर्जयतीति दृश्यते। एवं . . . निवेदयन्तीत्यादि। अत एव चुरादिभूतान् स्वरान्वितान् नाकरोत्।

[3] ibid., V. 2. 6: स्विद्यत इति च। (v.l. खिद्यते, भिद्यते); विद्यते, खिद्यते belong to Divādi class.

[4] ibid., V. 2. 5: क्षीयत इति कर्मकर्तरि।

[5] ibid., V. 2. 7: मार्गेरात्मनेपदमलक्ष्म।

[6] *Amaru.*, 89 (v. l. धूत्वा विलम्बितमेखला).

[7] Vāmana, V. 2. 8: लोलमानादयश्चानशि।

[8] ibid., *Vṛtti*.

[9] Q. by Vāmana, V. 2. 9.

K. C. C
Ganganatha Jha Kendriya Sanskrit Vidyapeetha
27815
25-2-84

कर्मसंज्ञा। अत्रोक्तमुदाहरणम्। द्वितीये तु पक्षे अगत्यर्थत्वाल्लभेर्णिच्यणौ कर्तुर्न कर्मसंज्ञा [1]। यथा

'सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन्।
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः॥' [2]

'तालैः शिञ्जद्वलयरणितं चामरग्राहिणीनाम्।' [3]

अत्र शिञ्जावलयेति पठनीयम्। शिञ्जेरात्मनेपदित्वात्। यथा 'विशिञ्जानपतत्रिसंघम्' इति छायावृक्षवत् समासः। [4]

'शेषाङ्गनिर्माणविधौ विधातुर्लावण्यमुत्पत्तुमिवास यत्नः।' [5]

अत्र 'अस गतिदीप्त्यादानेषु' इत्यस्माद्धातोः लिट् न, अस्तेः भूभावप्रसङ्गात्। [6] आसेत्यव्ययमिति केचित्। तथा चाव्ययसूत्रम् 'आसाह लिडर्थे' इति। [7]

'अथाह वर्णी विदितो महेश्वरः' [8]। अत्र भोजसूत्रम् 'तदादौ च' (I. 4. 146) इति। तदादौ चोपपदे भूते लट् च भवतीति वृत्तिः। एवं

---

[1] ibid., *Vṛtti*.

[2] *Śiś.*, I. 25. Q. by Vāmana.

[3] Not traced; cf. *Megh.* (II.12): तालैः शिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः। (v. l. शिञ्जावलय). See also *Durghaṭavṛtti*, p. 13, defending it by अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्।

[4] छायाप्रधानः वृक्षः छायावृक्षः।

[5] *Kum.*, I. 35.

[6] By अस्तेर्भूः (II. 4. 52); cf. *Durghaṭavṛtti*, p. 51: केचिदनुप्रयोगादन्यत्रास्तेर्भूभावं नेच्छन्ति इति धातुप्रदीपः।

[7] *Nipātāvyayopasargavṛtti*, I. 126 (विदर्थे).

[8] *Kum.*, V. 65. See *Durghaṭavṛtti*, p. 61: तिङन्तप्रतिरूपकोऽयमाहेति शब्दः कालसामान्यवचनः। Also Vāmana, V. 2. 44: आहेति भूतेऽन्यणलन्तभ्रमाद् ब्रुवो लिटि।

'यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियाम् ।' [1] इति ।

आहेति ब्रुवो लटि 'ब्रुवः पञ्चानामादित आहो ब्रुवः' (III. 4. 84) इत्याहेति व्युत्पादितः ।[2] स भूते प्रयुक्तः, यथा—'इत्याह भगवान् प्रभुः' [3] इति । अस्य भूतकालाभिधायिनो णलन्तस्याहेति भ्रमात् निपुणाश्चैवं प्रयुञ्जते । 'आह स्म स्मितमधुराक्षरां गिरम्' [4] इति ।

'अनुकरोति भगवतो नारायणस्य' [5]इति । अत्रापि मन्ये कविना स्मशब्दः प्रयुक्तः लेखकैस्तु न लिखित इति केचिदाचक्षते । तदसत् । यतः कस्यचिदेव भ्रमोऽस्य लेखनाभावस्य संभवति; न तु महतां बहूनामिति ।

'अयमुदयति भास्वान्' [6] अत्रायतीति भौवादिकस्य गत्यर्थस्य इ इत्यस्य ग्रहणं, न त्वयपयावित्यस्य ग्रहणम् । आत्मनेपदित्वात् । न च 'इण् गतौ' इति । तस्य एतीति रूपम् ।

'अथान्तरिक्षे नादोऽभूद् द्रोणं तत्र प्रशंसताम् ।
दुष्करं कृतवान् द्रोणो यदर्जुनमयोधयत् ॥' [7]

अत्राभूदिति भूतमात्रविवक्षया । यथात्र कृतवानिति । अयोधयदिति भूतानद्यतनमात्रविवक्षया । सर्वत्रैव ह्यत्र लिडेव युज्यते, क्रियाणां भूतानद्यतनपरोक्षत्वात् । सत्यम् । 'या तत्र स्याद्युवतिविषये' [8] इत्यत्र स्यादित्यव्ययम् । यद्यर्थे विवक्षायाः प्रयोजकत्वात् । तथा चोक्तम्

[1] *Ragh.*, XI. 3.

[2] cf. *Bhojasūtra*, (III. 1. 11): 'ब्रुवः पञ्चानां पञ्चादतो ब्रुव आहः' ।

[3] Q. by Vāmana (V. 2. 44).

[4] ibid. (MS. मधुमज्जदक्षरां).

[5] *Kādambarī*, beginning (line 25).

[6] Not traced. cf. *Śiś.* (IV. 20): उदयति विततोर्ध्वरश्मिरज्जौ (where उदयति is a participle, loc. Singular).

[7] *MBhā.*, IV. 53. 55

[8] *Megha.*, II. 22

'धात्वर्थस्यैव भूतादिकालभेदैः समन्वयः ।
न प्रत्ययार्थस्यैते च विवक्षावशवर्तिनः ॥' इति ।

'समीहे मर्तुमानचे'[1] 'इन्धिभवतिभ्यां च' (I. 2. 6) इत्यत्र इन्धेर्लिट्प्रत्ययानुवादेनामनित्य इति ज्ञाप्यते । तेनात्रामभावपक्षे रूपम् ।

'तं पातयां प्रथममास पपात पश्चात् ।'[2] 'कृञ्चानुप्रयुज्यते लिटि' (III. 1. 40) इत्यांप्रत्ययस्य पश्चात् लिटि परतः कृञनुप्रयुज्यते । अव्यवधानेन प्रयुज्यत इति यदुच्यते तदतन्त्रम् । 'उक्षां प्रचक्रुर्नगरस्य मार्गान्'[3] 'बिभयां प्रचकारासौ'[4] इति भर्तृहरिप्रयोगात् । अत एव 'तं योजयां विधिवदास समेतबन्धुः'[5] इति महाकविना तत्र तत्र प्रयुज्यते ।[6] सहृदयैरनुमन्यते च । तस्माद् भाषायामपि व्यवहितश्चाव्यवहितश्चानुप्रयोगो भवतीति स्थितम् ।[7] पदमञ्जरीकारस्याप्येवमेव राद्धान्तः ।[8]

[1] Bhaṭṭi, XIV. 63. Q. in *Durghaṭavṛtti*, III. 1. 36: 'इन्धिभवतिभ्यां च' (I. 2. 6) इति कित्त्वं ज्ञापयति इजादिनिमित्त आमनित्य इति न्यासः । The normal form would be: समीहांचक्रे ।

[2] *Ragh.*, IX. 61.

[3] Bhaṭṭi, III. 5.

[4] ibid., VI. 2: (°प्रचकारासौ काकुत्स्थादभिशङ्कितः ।).

[5] *Ragh.*, XVI. 86.

[6] cf.: 'प्रभ्रंशयां यो नहुषं चकार' । *Ragh.*, XIII. 36.

[7] cf. *Vārttika* and *MBh.* on III. 1. 42: विपर्यासनिवृत्त्यर्थम्, (ईहां चक्रे, चक्रे ईहामिति मा भूत् ।). व्यवहितनिवृत्त्यर्थं च । Bhaṭṭoji rejects such uses as wrong. But see Bhoja:

'आंकृञां व्यवधानेन प्रयोगश्छान्दसो भवेत् ।
भाषायामपि केषांचिन्मतेनोभयथा किल ॥' इति ।

तेन तं पातयां प्रथममासेत्यादि सिद्धम् ।

[8] Under, III. 1. 42.

[1] 'यो भर्तृपिण्डस्य कृते न युध्येत्'। अत्र युधमात्मन इच्छेदिति युध्येत्। न तु दैवादिकस्य 'युध संप्रहारे' इत्यस्य रूपम्, आत्मनेपदित्वात्।

'विरलायमानो मलयमारुतः'[2] इत्यादिषु भृशादिपाठात् क्यङ्, नापि क्यष् लोहितादिष्वपाठात्[2]॥

'घातयित्वा दशास्यम्' इत्यत्राहेतौ णिच्। चुरादौ, हन्त्यर्थाश्चेति (ग. सू. 200) पाठात्[3]॥

'अवेहि मां किंकरमष्टमूर्तेः'[4]। अत्र वृद्धिं बाधित्वा गुणे कृते 'ओमाङोश्च' (VI. 1. 95) इति पररूपत्वे च कृते अवेहीति रूपम्।[5]

'दूरयत्यवनते विवस्वति'[6]। अत्र णौ सति 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग. सू. 203) इत्यत्र बहुलग्रहणादिष्ठवद्भावे रूपम्। इष्ठवद्भावे तु 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः' (VI. 4. 156) इत्यादिना गुणलोपयोः कृतयोः दवयतीति रूपं भवति॥[7]

'पतितं वेत्स्यसि क्षितौ'[8]। अत्र वेत्स्यसीति न सिध्यति। इटः प्रसङ्गात्। अतः पदभङ्गः कर्तव्यः वेत्सि असीति। असीत्ययं निपातः

[1] *Pratijñāyaugandharāyaṇa*, IV. 3:

नवं शरावं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम्।
तत्तस्य मा भून्नरकं स गच्छेद्यो भर्तृपिण्डस्य कृते न युध्येत्॥

also Q. by Vāmana, V. 2. 28: युध्येदिति युधेः क्यचि।

[2] Vāmana, V. 2. 29: विरलायमानादिषु क्यङ् निरूप्यः।

[3] ibid., V. 2. 30: अहेतौ हन्तेर्णिच्। चुरादिपाठात्।

[4] *Ragh.*, II. 35.

[5] Vāmana, V. 2. 69: अवैहीति वृद्धिरवद्या।

[6] *Kum.*, VIII. 31b; Q. by Vāmana, V. 2. 78.

[7] See Vāmana, V. 2. 78: दूरयतीति बहुलग्रहणात्। and its *Vṛtti*.

[8] *Veṇīsaṃhāra*, III. 41; Q. by Vāmana, V. 2. 81: वेत्स्यसीति पदभङ्गात्। see also *Vṛtti* thereon.

त्वमित्यस्मिन्नर्थे वर्तते, क्वचित्तु वाक्यालंकारे, यथा 'पार्थिवस्त्वमसि सत्यमन्यथा:' [1] इति ।

'कामयानसमवस्थया तुलाम् ।' [2] अत्र 'युवोरनाकौ' (VII. 1. 1) इत्यत्र अनित्यमागमशासनमिति ज्ञाप्यते; तेन मुक्यकृते कामयान इति स्यात् ।

'तमादौ कुलविद्यानामर्थमर्थविदां वरः ।
पश्चात् पार्थिवकन्यानां पाणिमग्राहयत् पिता ॥' [3]

अत्र पूर्वार्धे बुध्यर्थत्वाद् उत्तरार्धे गत्यर्थत्वाद् द्विकर्मकता 'गतिबुद्धि ...' (I. 4. 52) इत्यादिना ।

'अमृतमम्बुनिधिर्ममन्थे ।' [4] अत्र 'नीवह्योर्हरतेश्च' [5] इति चकाराद् द्विकर्मकता ।

'रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ।' [6]

[1] Q. by Vāmana, loc. cit.

[2] *Ragh.*, XIX. 50. Also Vāmana, V. 2. 82: कामयानशब्दः सिद्धोऽनादिश्चेत् । cf. *Bhāgavata*, X. 47. 17: स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।

[3] ibid., XVII. 3.

[4] *Kirātārjunīya*, V. 30: येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे । Cf. *Prauḍhamanoramā* (p. 494): अत्रामृतं मुख्यम्, उद्देश्यत्वात् । अम्बुनिधिस्तु गौणः ।

[5] *Vārttika* on 1. 4. 52.

[6] *Ragh.*, IV. 85. Some portion is missing in all MSS. By मितां ह्रस्वः (VI. 4. 92) the causative form would be विश्रमयन्; but see also *Ragh.*, I. 54: अथ यन्तारमादिश्य धुर्यान् विश्रामयेति सः । *Durghaṭavṛtti* explains it thus: वा चित्तविरागे (VI. 4. 91) इति वाग्रहणानुवृत्तेर्व्यवस्थितविभाषात्वात् संक्रामयतीत्यादिसिद्धिरिति भाषावृत्तिः ।

'राज्ञा तिरस्कृतः' इत्यत्र[1] तिरःशब्दस्य 'तिरोऽन्तर्धौ' (I. 4. 71) इत्यन्तर्धौ गतिसंज्ञाविधानात् 'तिरसोऽन्यतरस्याम्' (VIII. 3. 42) इति सकारो न स्यात्। परिभवार्थत्वात्। तस्मात् तिरस्कृत इत्यनेन परिभूत उपचर्यते। परिभूतो ह्यन्तर्हितवद् भवतीति। 'लावण्यप्रसरतिरस्कृताङ्गलेखाम्'।[2] इति मुख्यप्रयोग इव लाक्षणिकः प्रयोगः शब्दविदामनुमत एव।

'केसरालं शिलीन्ध्रम्' इत्यत्र[3] केसरालमिति पदम् 'अल भूषणपर्याप्तिवारणेषु' इत्यस्माद्धातोः केसरशब्दे कर्मण्युपपदे 'कर्मण्यण्' (III. 2. 1) इत्यनेनाणि कृते केसरालमिति सिध्यति।

'पत्रलं वनमिदं व्यराजत' इत्यत्र[4] पत्रलमिति रूपं 'ला आदाने' इत्यस्माद्धातोः पत्रशब्दे कर्मण्युपपदे 'आतोऽनुपसर्गे कः' (III. 2. 3) इति कप्रत्यये सति भवति।

'महीध्रः' 'धरणीध्रः' इत्यादयः शब्दाः महीं धरतीत्यादि विगृह्य 'मूलविभुजादित्वात्' (वा. III. 2. 5) कप्रत्ययान्ताः।[5]

'कंसहा' 'शत्रुहा' 'मुरहा' 'ब्रह्मवित्' 'भ्रूणभित्' 'वृत्रजित्' इत्येवमादीनां न सिद्धिः। 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (III. 2. 87) इत्यत्र चतुर्विधश्चात्र नियम इष्यत इति वचनात्।[6] नियमश्चैवं ब्रह्मादिषूपपदेषु एव हन्तेरिति; ब्रह्मादिषूपपदेषु हन्तेरेवेति भूतकाल एवेति, क्विबेवेति च[7]।

[1] See Vāmana, V. 2. 11: तिरस्कृत इति परिभूतेऽन्तर्ध्युपचारात्। and *Vṛtti* thereon.

[2] Q. by Vāmana, loc. cit.

